UGC JOURNAL NO-40960 ISSN-0974-8946

अनुसन्धान-प्रकाशन-विभागीया

त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

(A REFEREED QUARTERLY RESEARCH JOURNAL)

४४ वर्षे प्रथमोऽङ्कः (जनवरीमासाङ्कः) २०१९ ई०

प्रधानसम्पादकः

प्रो० रमेशकुमारपाण्डेयः

कुलपतिः

सम्पादकः

डॉ० शिवशङ्करमिश्रः

सहसम्पादकः

डॉ० ज्ञानधरपाठकः

प्रकाशन-स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-११००१६

UGC JOURNAL NO-40960 ISSN-0974-8946

अनुसन्धान–प्रकाशन–विभागीया

त्रैमासिकी शोध–पत्रिका

शोध–प्रभा

(A REFEREED QUARTERLY RESEARCH JOURNAL)

४४ वर्षे प्रथमोऽङ्कः (जनवरीमासाङ्कः) २०१९ ई०

प्रकाशन–स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली–११००१६

प्रकाशकः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कुतुब इन्स्टीट्यूशनल एरिया, नवदेहली-११००१६

ISSN :- 0974 - 8946

४४ वर्षे प्रथमोऽङ्कः (जनवरीमासाङ्कः) २०१९ ई०

मुद्रकः - **अमरप्रिंटिंगप्रैसः**, दिल्ली

शोध-प्रभा

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य
अनुसन्धान-प्रकाशन-विभागीया शोध-पत्रिका

- एषा त्रैमासिकी शोध-पत्रिका।
- अस्याः प्रकाशनं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबरमासेषु भवति।
- अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धान-प्रवृत्तेरुद्बोधनं प्रोत्साहनं विविधदृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च विद्यते।
- अस्यां श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।
- अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादनभावानुवादटीकाटिप्पण्यादि-पुरस्सरं प्रकाशनमप्यस्यां क्रियते।
- प्रकाशित-निबन्धः पत्रिकायाः एक प्रतिः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।
- अस्यां पत्रिकायां विशिष्टानां संस्कृत-हिन्द्याङ्ग्ल-ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। आलोच्यग्रन्थस्यालोचना यस्मिन्नङ्के प्रकाशिता भवति सोऽङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते किञ्च समालोचनापत्राण्यपि यथासौविध्यं दीयन्ते। प्रकाशितशोधसामग्री लेखकस्यास्ति अतः लेखस्य मौलिकतादिविषये सम्पूर्ण दायित्वं लेखकस्य भविष्यति न तु सम्पादकस्य न वा प्रकाशकस्य।
- पत्रिकासम्बद्धन्यायालयीयविवादविषये दिल्लीन्यायालयक्षेत्रमेव परिसीमितमस्ति।
- अस्याः वार्षिकसदस्यताराशिः रु. ५००.०० पञ्चवार्षिकसदस्यताराशिः रु.२०००.००, आजीवन-**सदस्यताराशिः** रु. ५०००.००। सदस्यताराशिः **कुलसचिव, श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठ**, नई दिल्ली-१६, इति सङ्केतेन (बैंकड्राफ्ट अथवा मनीआर्डर) द्वारा प्रेषणीयः।
- **पत्रिकासम्बन्धी सर्वविधः** पत्रव्यवहारः 'सम्पादकः' 'शोध-प्रभा', श्रीलालबहादुरशास्त्री राष्ट्रिय-संस्कृतविद्यापीठ, कटवारिया सराय, नई दिल्ली-११००१६ इति सङ्केतेन विधेयः।

सम्पादकः

नैवेद्यम्

अहो माहात्म्यं प्रज्ञायाः यद्वशात् सर्वोऽपि सुखाय कल्प्यते। स्वात्माभेदप्रत्ययेन जगतोऽणुरपि न दोषभाक्, अपि तु परिस्फुरत्-प्रकाशमहिम्ना चितिरिव व्यपदिश्यते। तदेव महर्षिणामपि लभ्यं ध्येयञ्च योगिनाम्, यतः तत्प्रकाशारूढा एव महर्षयोऽपि आवरणं निरस्य जगतोऽवस्थानं चैतन्यमिव मन्वते। शास्त्रे तदेव महादेवपदेन व्यपदिष्टम्। भगवान् पतञ्जलिरपि समर्थयति ''महता देवेन नः साम्यं स्यादिति'' इत्यादि विधिना। अन्यत्रापि ''महान्तः पश्यन्तो दधति परमाह्लादलहरीय'' इत्युक्त्या तस्यैव विगलितवेद्यवेद्यान्तरानुभूतिविषयस्य आनन्दोपकारकत्वं निश्चप्रचमभिमतं भवति नूनमेवामुं सेवमानाः जनाः मायास्मिताहंकाररूपमलादिभिः कथमपि न स्पृश्यन्ते। तदेवास्माकं परमं प्रयोजनं जनैश्च साफल्यमिव प्रतिष्ठापितं भवति। अन्यथा संकुचितात्मा स्वकीयमपारं महिमानमविज्ञाय मूढात्मना व्यपदेशीभवन् अज्ञ इव कथमपि साफल्यरहितोऽचरितार्थ इव नष्टधनम् औदासीन्यं सेवते। तदेव वेदाः प्रमाणम् उत त्वं पश्यन् न ददर्शवाचम् इत्यादि। गीतायामपि स्मृतमेतत् ''पश्यन्नपि न पश्यति'' इत्यादिना। प्रज्ञारूढस्य तु निशापि दिवा भवति, तदेवाह **सा निशा पश्यतो मुनेः** इत्यादि। एतद् अप्नोदाय एव। अर्जुनोऽपि भगवन्तं प्रार्थयामास कार्पण्यदोषोपहतः स्वभावः इत्यादि। कार्पण्यं हि नाम संकुचितत्वम् अज्ञत्वं वा। यतः संकुचितात्मा न समाजस्य, न वा आत्मनः, अंशतोऽपि कल्याणं कर्तुं समर्थो भवति। लोके यथा निगडितो जनः स्वतन्त्रत पादविहारेऽपि विकलः, तथैव प्रज्ञाविवेकेऽपि मलग्रस्तात् पुनः अकिञ्चित्करत्वमेव उच्यते। अतस्तदर्थं मलाप्नोदाय ज्ञानमेव कारणमिति मत्वा अस्माभिः तत्रोपलब्धये यतनीयम्। अविद्यान्धकारस्यैव अपरं नाम मलम् इति। ध्वान्तप्रध्वंसकरणं नूनमेव व जिज्ञासूनां अभिलाषः, प्रज्ञाधनानान्तु कर्मोपहितसुहृद्भावजन्यः कृपा प्रसादः। तदेव सुहृद्भूत्वा काचार्या अस्मभ्यमुपदिशन्ति, अन्यथा अन्धकारमग्नानां क्व कल्याणं स्यात्।

अद्यत्वेऽपि अनादितोऽवच्छिन्नप्रवाहपरम्परामुपदधत् आचार्यकदम्बोऽयं स्वसम्प्रदायानुगुणं केवलमस्माकं कल्याणमुद्दिश्य स्वकीयां वाचं प्रयोजयति। ततोऽपि साम्प्रतं प्रातिभमवलोक्य तत्संरक्षणाय सम्वर्द्धनाय च लेखनं कर्म स्मरणार्थं लिपेः स्मारकत्वात् महान्तमुपकरोति। तत्र अस्माभिरवश्यमेव स्वकीयमुत्तरदायित्वं मत्वा संस्काराधानाय आहिताचाराणां विचारः प्रकाशनीयः। तदेव कर्म शोधप्रभा अनुष्ठापयति। तदर्थं तत्र साहाय्यं कृतवद्भ्यो यथायथम् उत्साहवर्धनं प्रकल्प्य अहमपि सन्तोषमुपदधे।

प्रो. रमेशकुमारपाण्डेयः
कुलपतिः

सम्पादकीयम्

संस्कृतं भारतीयसंस्कृतेः आत्मतत्त्वम्। संस्कृतं नाम दैवी वाक् अन्वाख्यातं महर्षिभिः। एतत्प्रभावादेव निखिलेऽस्मिन् जगति प्रतिष्ठितास्माकं भारतीया संस्कृतिः। भारतीयसंस्कृतेः वैभवाद् कृत्स्नेऽपि नभसि भारतस्य गौरवपताका दोधूयमाना विराजते। इयं च संस्कृतिः संस्कृतं विना सर्वथा निष्प्राणभूता। अतो भारतस्य ज्ञानवैभवम्, भारतस्य गुणगणगौरवम्, भारतस्य विपुलमैतिह्यम्, भारतीयं जीवनं चरित्रं शस्त्रं शास्त्राञ्चावबोद्धुमेकमेव यत् श्रेष्ठतमं साधनं वरीवर्ति, तदस्ति संस्कृतम्।

संस्कृतमाध्यमेनैव भारतस्य विस्तरेण परिचयः प्राप्तुं शक्यते। भारतं यैर्गुणनिचयैः स्वस्मिन् माहात्म्यमवधारयति, विश्वेऽस्मिन् वैशिष्ट्यमावहति तत्सर्वमत्र देववाणीतः समागतम्। किं बहुना भारतस्य व्याख्या परिभाषा च संस्कृतेनैव व्याख्यातुं पार्यते नान्यथा, अतएवोच्यते-

संस्कृतेनैव सुसम्पुष्टं भारतं भारतमुच्यते। संस्कृतेन विना देशः केवलं चेण्डियोच्यते॥

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम्। वर्ष तद् भारतं नाम भारती यत्र सन्ततिः॥

संस्कृतमस्मासु संस्कारं जनयति, ऐक्यं सम्पादयति, विश्वबन्धुत्वं स्थापयति, मित्रभावं परिष्करोति संगच्छध्वं संवदध्वम् इति भावं दृढ़ीकरोति, सर्वेऽपि सुखिनः सन्तु इत्यौदार्यं सन्दिशति किमधिकं सर्वत्र शान्तिसंस्थापनाय, अहिंसा-सत्य-अस्त्येय-ब्रह्मचर्य-अपरिग्रहभावानां विस्ताराय, शौच-सन्तोष-तपः- स्वाध्यायेश्वरप्रणिधानाय भारते संस्कृतमेवानितरसाधारणसाधनं सम्भवति। इयमत्यन्तं लोकोपकारिका, अमृतसमा, माधुर्यसंवाहिका, कर्णौ सुखं ददती आत्मन्याह्लादं जनयति, लोकं ददाति लोकोत्तरञ्च संसाधयति अतएवोद्घोषितं केनचित् कविना-

अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम्। देवभोग्यमिदं तस्माद्देवभाषेति कथ्यते॥

सम्प्रति भारतसर्वकारः संस्कृतस्य संरक्षणाय संवर्धनाय च बद्धपरिकरो दृश्यते। कथं संस्कृतस्य वातावरणं सर्वत्र सम्भवेत्? कथं संस्कृतं जनभाषा भवेत्? कथं संस्कृतसम्भाषणे सामान्योऽपि जनः दक्षो भवेत्? इति विषये निरन्तरं चिन्तयन्ती संस्कृतभारती अहर्निशं कार्यं करोति। तस्य प्रभावोऽपि समाजे दरीदृश्यते जनाः अल्पाभ्यासेनापि अत्यन्तं सारल्येन संस्कृतसम्भाषणे दक्षाः भवन्ति। सन्देशोऽयं मनः आत्मानञ्च नितरां सन्तोषयति।

शोधप्रभायाः प्रकृतेऽस्मिन्नङ्के नैकविधविषयगाम्भीर्यमण्डिताः त्रयोदशशोधनिबन्धाः प्रकाश्यन्ते। प्रखरप्राञ्जलप्रतिभासम्पन्नैः नदीष्णैः सुधीभिः अनुसन्धानपद्धतिमाश्रित्य तत्तद्विषयेषु गवेषणापूर्वकं मौलिकमपूर्वञ्चान्वेषणमनुष्ठितम्। अनुसन्धानपथि प्रवृत्तानामाचार्याणामनुसन्धातॄणाञ्च प्रतिभाप्रगल्भेन शोधप्रभायाः 'प्रभा' सर्वत्र विलसत्विति धिया निकषधिषणापूरितविषयवस्तुजातस्य प्रकाममुद्बोधनाय सम्प्रार्थये सरस्वतीसपर्यापरान् विद्वांसो मनीषिणः।

डॉ. शिवशङ्करमिश्रः, शोधप्रकाशनविभागाध्यक्षः

विषयानुक्रमणिका

संस्कृतविभागः

हिन्दी विभाग

English Section

ISSN - 0974-8946 शोधप्रभा
जनवरी-मार्च, 2019 वर्षः 44, प्रथमोऽङ्कः

लक्षणाविमर्शः

डॉ.रामसलाहीद्विवेदी

प्रमाणानि प्रमेयाणामबाधितत्त्वमुपकल्प्य स्वकीयं साफल्यमुपपादयन्ति। अत एव भवन्ति ते अज्ञातज्ञापकानि न तु अकृतकारकाणि लोकानुभवात्। तानि च दर्शनभेदेन बहुधा सम्मतानि, परं प्रमाणचतुष्टयस्य प्राचुर्येण स्वीकरणमुपलभ्यते। तेषु शब्दप्रामाण्यस्य महान् आदरः, यतः लोकातीतं यावदपि आर्षज्ञानं तत्सर्वमबाधितदिशा शब्देषु प्रतिष्ठाप्यते। अत एव तर्कस्य प्रतिष्ठापि शब्दमहिमानं नातिशेते। तत्र शब्दार्थसम्बन्धानां नित्यत्वमपि प्रामाण्यानुरोधेनैव परिकल्पितं भवति। अन्यथा सम्बद्धस्यानित्यत्वात् अनियतार्थबोधेन तस्य प्रामाण्यं भज्येत। तदेव प्रमाणशिरोमणेः वेदस्य अक्षरब्रह्मणः अनुकारत्वमनुमन्य तस्य विधातृत्वमेव प्रकल्पितम्। तदेवोक्तम्-

विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः।
विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः।। इति

एवंप्रकारेण चैतन्यो हि शब्दराशिः सर्वमार्षं ज्ञानमनुपप्लुतचेतसामृषीणामनुभूतं स्वसामर्थ्यादुपस्थाप्य स्वकीयं प्रामाण्यं परिकल्पयति। तस्मादर्थबोधनात् तस्य कारणत्वमपि निर्बाधं भवति। लोके हि काञ्चित् कारणानि स्वरूपत एव जनयन्ति कार्यं यथा त्वगादीनि स्पर्शादिकम्, परन्तु शब्देषु स्वरूपतः कारणता न परिलक्ष्यते तदेव अगृहीतशक्तिमतां बोधस्यानुदयोऽनुभूयते। किञ्च न हि असम्बद्धार्थस्य प्रतिपत्तिप्रमेयः कस्यापि समजनि। प्रपञ्चितमेतत् सर्वं मञ्जूषाप्रभृतिग्रन्थेषु[1]। अत एव शाब्दबोधमुपक्रम्य काचित्कारणता उपक्लृप्ता। सा च **"तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरुपितवृत्ति- विशिष्टं ज्ञानं हेतुः[2]"** इति। अत्र येन प्रकारेण ज्ञानं तेनैव प्रकारेणोपस्थितिः स्यात्तदर्थमुभयदलेऽप्यवच्छिन्ननिवेशः, किञ्च ज्ञाने वृत्तिवैशिष्ट्यं "स्वविषयकत्व, स्वविषयकत्वोद्बुद्ध-संस्कारसामानाधिकरण्य" इत्युभयसम्बन्धेनावधार्य सर्वमपि अतिशङ्कितं निःशङ्कीकृतम्। सा च वृत्तिः त्रिधेति मतान्तरानुरोधेन। वैयाकरणसम्प्रदाये तु वृत्तिः द्विविधा शक्तिव्यञ्जनाभेदेन। क्वचित् साहित्यलक्षणग्रन्थेषु वृत्तेः त्रैविध्यमपि परिगीतम्, तत्र शक्तिस्त्रिधा इति शब्दान्तरम् अभिधालक्षणाव्यञ्जनाभेदेन। परन्तु अस्मत्सम्प्रदाये वृत्तिशब्देनैव व्यवहारः समुपलभ्यते। तदेव

---

* सहाचार्यः, व्याकरणविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली-110016

1. तत्रागृहीतवृत्तिकस्य शाब्दबोधादर्शनात् न हि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यत इति समर्थसूत्रभाष्याच्च, वै.सि.ल.म. शक्तिनिरूपणम्।
2. वै.सि.ल.म. शक्तिनिरूपणम्, पृ.सं. 10

"हलोऽनन्तराः संयोगः[1]" इत्यस्मिन् सूत्रे अनन्तराशब्दस्य व्याख्यानावसरे **"अस्ति च वर्तते शाला समुदाये ग्रामशब्दः[2]"** इत्याकारके समुदीरिते वाक्ये "अस्ति", "वर्तते" इत्युभयसमानार्थकक्रियापद-प्रयोगादेकस्य वर्तते इति पदस्य वृत्तौ तात्पर्यमवधार्यते। तदेव वर्तनाद्वृत्तिः इति विवरणमपि आनुकूल्यमुपैति। यथा पश्य मृगो धावति इत्यत्र कर्मतया केवलं धावनं समुच्चीयते, लकारार्थोऽविवक्षामेति। तथैवात्रापि लकारार्थस्याविवक्षा विज्ञेया। तदेवोच्यते वृत्तिस्त्रिधा शक्तिर्लक्षणाव्यञ्जनाभेदात्। वृत्तिस्वरूपमपि न्यायमीमांसाप्राचीनवैयाकरणनव्यवैयाकरणमतानुरोधेन पृथक् पृथगेव[3]।

प्रकृतावसरस्तु लक्षणाव्याख्यानस्यात एतदतिरिच्य तत्रैव लक्षणमनुसन्धीयते। तत्र "शक्यार्थसम्बन्धो लक्षणा" इति तार्किकमतम्। शक्यश्चासौ अर्थः शक्यार्थः, तस्य सम्बन्ध इति शक्यार्थसम्बन्धः स एव लक्षणा इति तात्पर्यम्। क्वचित्तु "शक्यसम्बन्धो लक्षणा" इत्यादिरूपं वाक्यमुपलभ्यते, अस्मिन् मते शक्तिज्ञानजन्यलक्ष्यार्थविषयकसंस्कारस्यापेक्षा न जायते। यद्यपि अस्मिन् लक्षणे तीरत्वावच्छिन्नबोधजनकत्वस्य लक्षणात्वे तीरतीरत्वयोः बोधसम्भवेऽपि प्रवाहस्य सम्बन्धोऽशक्यतयैव प्रतिभाति। अतः केचन "सम्बन्ध एव लक्षणा" इति वदन्ति। अत्र एव शब्दोऽप्यर्थकः, तेन संस्कारगर्भितस्यापि लक्षणस्य समन्वयो जायते। तदेव "अन्वयाद्यनुपपत्तिज्ञानपूर्वकं शक्यत्वेन गृहीतार्थसम्बन्धज्ञानेन उद्बुद्धसंस्कारतो बोधे लक्षणा" इत्यादिरूपं लक्षणालक्षणं समुपलभ्यते। एतेन केवलं शक्यसम्बन्धो लक्षणा इति व्यवहारः निरस्तः। किञ्च शक्यसम्बन्धो लक्षणा इत्येतल्लक्षणं वाक्येऽप्रसरणात् स्वज्ञाप्यसम्बन्धो लक्षणा इत्यादिरूपं लक्षणं मीमांसका वदन्ति। तस्य विवरणं तु स्वं पदादिः तज्ज्ञाप्यो योऽर्थः तत्सम्बन्धेन उद्बुद्धो यः शक्तिजन्यः संस्कारः ततो यत्र बोधः तत्र लक्षणा। अत एव गभीरायां नद्यां घोषः इत्यत्र लक्षणाया अवसर उपपद्यते। अन्यथा शक्यसम्बन्धरूपलक्षणायाः तत्राभावात् वाक्यार्थानिष्पत्तिः स्यात्। गभीरायां नद्यामित्यत्र तु सप्तम्यन्तपदाभ्यामुपस्थितयोरर्थयोरभेदान्वयो लक्ष्यते, तेनैव लक्षणासंचारः। यदि तु गभीरपदेन तीरं लक्ष्यते तदा तीराभिन्ना नदी इति बोधापत्तिः स्यादेव। तदेव "स्वज्ञाप्यसम्बन्धो लक्षणा" इति प्रतिज्ञातं भवति।

लक्षणायाः वृत्तित्वमङ्गीकरणीयमेव। वृत्तित्वं तु "शाब्दबोधजनकपदपदार्थसम्बन्धत्वम्" इति। एतेन अस्याः वृत्तेरर्थनिष्ठत्वेऽपि स्वविषयकसम्बन्धिवाचकत्वेन पदनिष्ठत्वमपि प्रकल्प्यते। अस्याः वृत्तेः ग्रहणार्थं संस्कारस्य नितान्तमेवापेक्षा जायते, स च संस्कारः शक्यत्वेन गृहीतार्थसम्बन्धज्ञानेन उद्बुद्धो भवति तेनैव शक्तेरप्यनुमानं जायते। यथा गङ्गायां घोष इत्यत्र शक्तिविषयत्वेन ज्ञातः यः प्रसिद्धार्थः भगीरथखातावच्छिन्नचलज्जलप्रवाहरूपः तस्य यः सामीप्यादिसम्बन्धः तस्य च यज्ज्ञानं स्मरणात्मकं तेनोद्बुद्धः यः शक्तिविषयकसंस्कारः तज्जन्यबोधे एव लक्षणा इति अनुभवः स्पष्टं प्रतीयते। अत एव वक्तुं शक्यते "लक्ष्यार्थविषयकसंस्कार एव लक्षणा" इति। अतः लक्षणायाः वृत्तिरूपत्वात् तज्जन्यबोधस्यापि शाब्दबोधत्वमेव अभ्युपेयम्, यत्तु मीमांसकमते प्रवादः श्रूयते "लाक्षणिकं

---

1. पा.सू. 1.1.7
2. महाभाष्यम् 1.1.7
3. अर्थसंग्रहः विधिमीमांसाप्रकरणम्

पदं नानुभाविकम्" यथा गङ्गायां घोष इत्यत्र गङ्गापदेनैव घोषपदासमभिव्याहारे तीरार्थस्य बोधः न जायते, परं घोषपदसमभिव्याहारे तु जायत एव। तेन घोषपदमेव तीरबोधकं निश्चयेन प्रतिभाति। अतः लाक्षणिकं नानुभाविकमिति सङ्गच्छते, परन्तु विचारणीयं भवति यदि तीरपदस्य घोषपदेन अभिव्यक्तिरङ्गीक्रियते तदा तीरस्याधारता भज्येत। यतः "प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानाम्" इत्येष नियमोऽवश्यमेवाभ्युपेयः। तदेव महाभाष्यकारोऽपि "प्रकृतिप्रत्ययौ सहार्थं ब्रूतः तयोः प्रत्ययार्थस्यैव प्राधान्यम्" इत्याकारकः कश्चिन्नियमः प्रकल्पितः। तस्मात् लाक्षणिकं पदं नानुभाविकमिति तु भिन्नाभिप्रायेण। स तु विध्यंश एव प्रवर्तते, तदेव "न विधौ परः शब्दार्थः" इति प्रवादोऽपि सामञ्जस्यमुपगच्छति। तेन विध्यंशे एव "लाक्षणिकं पदं नानुभाविकम्" इत्यस्य प्रसरता ज्ञेया। यतोऽपूर्वज्ञानविषयत्वस्यैव विधेयतया प्रतीतिः सर्वैरेवानुभूता। अप्राप्तविधानमेव विधित्वेन परिगण्यते, तदेव "अज्ञातार्थज्ञापको वेदभागो विधिः"[6] इति। अत्राज्ञातार्थ एव तात्पर्यमतः लोकेऽपि एवम्भूतं लक्षणं विधातुं शक्यते। तेन विधौ लक्षणा न प्रसरति, यतः लक्षणायाः संस्काराधिष्ठानतया ज्ञातशक्यार्थसम्बन्धरूपत्वेनैव विधानाद्विधौ तस्या असम्भवनीयत्वमेव। तदेव मुख्यार्थबाधः अस्यां बीजम्, मुख्यार्थबाधश्च "समभिव्याहृतपदतात्पर्यविषये मुख्यार्थतावच्छेदकरूपेण मुख्यार्थसंसर्गः" इति। यथा छत्रिणो यान्ति, यष्टीः प्रवेशय, काकेभ्यो दधिरक्ष्यताम् इत्यत्र समभिव्याहृतक्रियासु तत्तदर्थानां कर्तृत्वादिरूपेणान्वयस्य बाधेऽपि तात्पर्यविषयेषु गमनभोजनादिषु मुख्यार्थतावच्छेदकरूपेणान्वयः जायत एव इति हेतोः तात्पर्यानुपपत्तिरूपमेव न तु अन्वयानुपपत्तिरूपम्। अतः यत्र लक्षणा जायते तत्र विशेषणीभूतेऽर्थ एव शक्यतावच्छेदकरूपेण शक्यार्थस्यापि बोधः निर्बाधः। क्वचित्तु तथा न इति तु अन्यदेतत्।

वस्तुतस्तु वेदानामपौरुषेयत्वमिति मते अर्थवादवाक्येषु सङ्गतेः संरक्षणार्थमन्वयानुपपत्तिरूपं बीजमपि अङ्गीकरणीयमेव। तदेव सभापतिशर्मोपाध्यायाः अस्य समर्थनमपि कुर्वन्ति। तद्यथा "वस्तुतस्तु वेदस्यापौरुषेयत्वे यजमानः प्रस्तरः, आयुर्वै घृतम् इत्यादौ तात्पर्यानुपपत्तेरप्यसम्भवेनान्वयतात्पर्यान्यतरानुपपत्तेरेव लक्षणाबीजत्वमुचितम्"[1] इति। अतः "शक्यत्वेन गृहीतार्थसम्बन्धज्ञानेन उद्बुद्धशक्तिसंस्कारो लक्षणा", "शक्यार्थसम्बन्धो लक्षणा", "सम्बन्ध एव लक्षणा", "स्वज्ञाप्यसम्बन्धो लक्षणा" इत्यादीनि बहूनि लक्षणानि समुपलभ्यन्ते। यद्यपि एतेषां लक्षणानां ग्रन्थप्रसङ्गः न निर्दिष्टः तथापि श्रीमता नागेशभट्टेन मञ्जूषायां लक्षणोपस्थापनसमारम्भ एवैतत्सर्वमुपदर्शितम्। अन्यत्रापि साहित्यदर्पणप्रभृत्यलङ्कारिकग्रन्थेषु अस्याः लक्षणानि एवमुपलभ्यन्ते।

मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।[2]

एतेषु लक्षणेषु स्पष्टं प्रतिभाति यदियं लक्षणा सर्वत्रारोपितैव, अतः नागेशेन शक्यतावच्छेदकारोपस्यैव लक्षणात्वमङ्गीकृतम्। तदेव मञ्जूषायां परे तु इति कृत्वा स्वकीयं मतमुपस्थापितम्। तद्यथा – "परे तु

---

1. वैयाकरणसिद्धान्तलघुमञ्जूषा लक्षणानिरूपणम् पृ.सं.96, चौखम्भा संस्कृत सीरिज, 1993
2. काव्यप्रकाशः

आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत् पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे, व्यक्तिविशेषबोधे वा लक्षणा"[1] इति। अत्रेदमवधेयं यत् साहित्यदर्पणकाव्यप्रकाशेतिग्रन्थद्वयेऽपि लक्षणायाः तटस्थलक्षणमेव संकेतितम्। परन्तु पण्डितराजः श्रीजगन्नाथः "शक्यसम्बन्धो लक्षणा" इति लक्षणेन तस्याः स्वरूपमप्यवधारयति। शक्यसम्बन्धो लक्षणा इत्यत्र शक्यस्य सम्बन्धः शक्यसम्बन्ध इत्येवं रूपेण व्याख्यानं कर्तव्यम्। तदेवान्यार्थपदेन तस्य संग्रहः, अन्यथा संकेतितार्थे एव तत्प्रवेशात् लक्षणाविधानमेवानपेक्षितं स्यात्। ध्वन्यालोके "भाक्तमाहुस्तमन्ये" इति कारिकांशस्य व्याख्यानावसरे भाक्तं लाक्षणिकमिति कृत्वा यद्विवरणमुपात्तं तस्य विवेचनावसरे लोचनकारः आनन्दवर्धनः "भज्यते सेव्यते पदार्थेन प्रसिद्धतयोत्प्रेक्ष्यत इति भक्तिर्धर्मोऽभिधेयेन सामीप्यादिः, तत आगतो भाक्तो लाक्षणिकोऽर्थः। यदाहुः-

अभिधेयेन सामीप्यात्सारूप्यात्समवायतः।
वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता।।

इति। गुणसमुदायवृत्तेः शब्दस्यार्थभागस्तैक्ष्ण्यादिर्भक्तिः, तत आगतो गौणोऽर्थो भाक्तः"[2] इत्यादि। अत्रापि प्रसिद्धार्थपरित्यागपूर्वकमभिधेयार्थसम्बन्धेन निर्धारितसामीप्यादिसम्बन्धान्यतमेषु जीवातुमुपादाय प्रवर्तमानैषा इत्येव लक्षणं संलक्ष्यते। आहत्य वक्तुं शक्यते यदस्मिन् प्रसङ्गेऽपि लक्षणायाः तटस्थलक्षणमेवोपादीयते। अत्रायं निष्कर्षः यत्सम्बन्धसंस्मारक उद्बुद्धः यः शक्तिविषयकः संस्कारः तज्जन्यबोधे लक्षणेति। तेन लक्ष्यार्थविषयकसंस्कार एव लक्षणा इत्यपि लक्षणं प्रतिभाति। संस्कारश्च जन्मान्तरीयोऽपि ग्राह्यः, तदेव बालानां तिरश्चाञ्च बोधः जायते। यद्यपि सभापतिशर्मोपाध्यायमहाभागैः जन्मान्तरीयसंस्कारस्य प्रत्याख्यानं कृतम्, ते च वदन्ति -"वस्तुतस्तु नेदं विचारसहम्, जन्मसमये बालानां तिरश्चाञ्च न हि वाक्यश्रवणं स्तनपानप्रवृत्तिप्रयोजकम्, किन्त्वदृष्टरूपोद्बोधकवशादिष्ट-साधनताप्रकारकं स्मरणात्मकं ज्ञानमेव प्रवृत्तिप्रयोजकमिति शब्दनिष्ठभक्तिजन्यः संस्कारो जन्मान्तरीयोऽपीति चिन्त्यम्"[3] इति। परन्तु "न सोऽस्ति प्रत्ययो लोके" इत्यस्याः कारिकायाः व्याख्यानावसरे सर्वस्याप्यर्थजातस्य शब्देन सह तादात्म्यमास्थायैव प्रतीतिरिति प्रतिपादितसिद्धान्तानुसारं सर्वत्रापि सूक्ष्मोच्चारणस्य सत्त्वात् नागेशभट्टस्य मतमबाधितमेव। अत एव मौनिश्लोके शाब्दबोधोऽङ्गीक्रियते।

अत्र सर्वत्र लक्षणेषु लक्षणाया आरोपितत्वमेवाङ्गीकृतम्। केचनार्थवृत्तिसम्बन्धस्य स्वाश्रयप्रतिपादकत्वसम्बन्धेन शब्देऽन्वयमुपपादयन्ति। वैयाकरणास्तु शक्यतावच्छेदकारोपस्यैव लक्षणात्वेन व्यवहारं प्रकल्पयन्ति, तत्र भाष्यं प्रमाणम्। तच्च भाष्यं "पुंयोगादाख्यायाम्" इति सूत्रस्थमेव। तत्र हि गोपीति शब्दस्य व्याख्यानावसरे गोकर्मकपालनकर्तृत्वरूपप्रवृत्तिनिमित्तस्य तत्राभावात् सोऽयमित्यभिसम्बन्धात् गोपत्वस्यारोपः कृतः। एवमेव "तस्येदम्" इति सूत्रस्य व्याख्यानावसरे तादृशेऽर्थ एव अण्प्रत्ययस्य साधुत्वं मन्यमानाः सादृश्यमूलकेष्वर्थेषु तदभावादसाधुत्वापत्तिमाशङ्क्य एवं व्याजहार भगवान् भाष्यकारः – "गोपी इत्यादौ गोपसम्बन्धिस्त्रीत्वेन लक्षणायां तस्येदं गोपी इत्यादौ गोपसम्बन्धिस्त्रीत्वेन लक्षणायाम्,

1. वैयाकरणसिद्धान्तलघुमञ्जूषा लक्षणानिरूपणम् पृ.सं.112, चौखम्भा संस्कृत सीरिज, 1993
2. ध्वन्यालोकः, सलोचनः, प्रथमोद्योतः, पृ.सं.30, चौखम्भा विद्या भवन वाराणसी, 2006
3. वैयाकरणसिद्धान्तलघुमञ्जूषा लक्षणानिरूपणम् पृ.सं.96, चौखम्भा संस्कृत सीरिज, 1993

तस्येदम् इति शास्त्रेण तादृशेऽर्थेऽण्प्रत्ययान्तस्यैव तादृशवाक्यस्यैव वा साधुत्वनियमादसाधुत्वापत्तिं दूषणमभिसन्धाय नावश्यमयमेवाभिसम्बन्धो भवति तस्येदमिति, किन्तु तन्मूलकः सोऽयमित्यप्यभिसम्बन्धोऽस्ति इत्युक्त्वा चतुर्भिः प्रकारैस्तस्मिन् स इत्येतद्भवति, तात्स्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात्। मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोषः, यष्टीः प्रवेशय"[1] इति।वाक्यपदीयकारोऽपि –

लिङ्गं लिङ्गपरिज्ञाने सूत्रं प्रत्ययशासकम्।
सोऽयमित्यभिसम्बन्धात् पुंशब्दे स्त्र्यभिधायिता॥

इत्युक्त्वा मतमेतत् समर्थितवान्, तेन सामीप्यादिसम्बन्धमूलकशक्यतावच्छेदकारोप एव लक्षणा इति लक्षणं पर्यवसन्नम्। यथा गङ्गापदस्य शक्यतावच्छेदकप्रवाहविशेषस्य तीरे आरोपात् तीरस्यापि प्रवाहविशेषत्वेनैव बोधः। यद्यप्येवंविधं ज्ञानं बाधज्ञानेन संश्लिष्टं तथापि व्यञ्जनया तत्राभेदानुसन्धानं विधायात्र बाधितस्यापि ज्ञानस्य बोध्यविषयत्वमुपगच्छन्ति। न हि व्यञ्जनाजन्यबोधे बाधकज्ञानस्य प्रतिबन्धकत्वम्, नागेशभट्टस्तु शब्दानुपपत्तिमूलकारोपितार्थे बाधकज्ञानेन नाप्रामाण्यग्रहो जन्यते, अत एव पचति इत्यादिजबोधे नाप्रामाण्यग्रहः[2]। भर्तृहरिरपि समर्थयति सिद्धान्तमेनम् –

अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः[3]

इति। तदेव व्यक्तिविशेषस्य बोधाङ्गीकारात् कमलानि कमलानि इति संगच्छते। तेनात्र सौरभविशिष्टस्यैव कमलत्वेन बोधः, कमलपदस्य तु कमलत्वावच्छिन्नविषयकबोधजनकत्वेऽपि कमलत्वव्याप्यधर्मावच्छिन्नस्य बोधः लक्षणयैव। अत्र सभापतिशर्मोपाध्याया एवं प्रतिपादयन्ति – "नन्वत्र शक्यतावच्छेदकारोपो दुर्वचस्तद्धर्माभाववति तद्धर्मप्रकारकज्ञानस्यैवारोपपदार्थत्वेन कमलानि कमलानि इत्यत्र तद्धर्माभावाभावादिति चेत्, न लक्षणास्थले लक्षकपदस्य स्वशक्यतानवच्छेदकधर्मवन्निष्ठ-विशेष्यतानिरूपितस्वशक्यतावच्छेदकनिष्ठप्रकारताकप्रतीतिजनकतया तादृशप्रतीतेरेवारोपपदार्थत्वात्"[4] इति। तेनात्र व्यक्तिविशेषस्य बोधः निर्बाधः। अत एव लघुशब्देन्दुशेखरेऽपि "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इति सूत्रस्य व्याख्यानावसरेऽन्वयानुपपत्तिपूर्विका लक्षणा पद एव, प्रत्ययोत्पत्तिः सर्वत्र शक्याथ एव इत्युक्त्वा सिद्धान्तमाह शक्यतावच्छेदकारोप एव लक्षणेति न लक्ष्यासंग्रहो दोष इत्युक्तवान् नागेशः। तस्य व्याख्यानमपि नित्यानन्दपर्वतीयमहाभागेन एवं कृतम् – "एवञ्च शक्यतावच्छेदकरूपेण लक्ष्यस्य भानान्न तत्र विभक्त्यर्थान्वयानुपपत्तिः। स्वप्रकारकारोपविशेष्यत्वसम्बन्धेन तस्यैव प्रकृत्यर्थतावच्छेदकविशिष्टत्वात्। अत एव गङ्गायां घोषमीनौ इति प्रयोगोपपत्तिः। शक्यलक्ष्ययोर्विभिन्नरूपेणोपस्थितौ तु एकरूपावच्छिन्ने मीनघोषयोरनन्वयात् द्वन्द्वो दुर्लभः स्यादिति

1. महाभाष्यम् 4.1.48
2. वैयाकरणसिद्धान्तलघुमञ्जूषा लक्षणानिरूपणम् पृ.सं.113, चौखम्भा संस्कृत सीरिज, 1993
3. वा.प.2.206
4. वैयाकरणसिद्धान्तलघुमञ्जूषा लक्षणानिरूपणम् पृ.सं.113, चौखम्भा संस्कृत सीरिज, 1993

बोध्यम्"[1] इति।अन्यथा प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति नियमेन तत्राधिकरणरूपविभक्त्यर्थे विशेष्यतया लक्ष्यार्थस्य भानं न स्यात्। लक्षणैषा सम्बद्धार्थे एव इति मतं सर्वेऽपि स्वीकुर्वन्ति, तदेवाह गौतम: "सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणबालकटराज-सक्तुचन्दनगङ्गाशकटान्नपुरुषेष्वतद्भावेऽपि तदुपचार:"[2] इति। पुनश्च भर्तृहरि: कारिकाद्वयेन समर्थयति-

एकमाहुरनेकार्थं शब्दमन्ये परीक्षका:।
निमित्तभेदादेकस्य सार्वार्थ्यं तस्य भिद्यते।।[3]
सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मण:।
प्रसिद्धिभेदाद् गौणत्वं मुख्यत्वं चोपचर्यते।।[4]

1. लघुशब्देन्दुशेखर: कारकप्रकरणम्, पृ.सं.423, चौखम्भा प्रकाशन वाराणसी, 2064
2. न्यायदर्शनम्, 2.2.63
3. वाक्यपदीयम् 2.252
4. वाक्यपदीयम् 2.255

ISSN - 0974-8946 शोधप्रभा
जनवरी-मार्च, 2019 वर्षः 44, प्रथमोऽङ्कः

सांख्ययोगदर्शनयोरीश्वरस्य स्वरूपम्

डॉ. मारकण्डेयनाथतिवारी

सांख्यास्तावत् सत्कार्यवादमङ्गीकुर्वन्ति। कार्यमव्यक्तरूपेण स्वकारणे सर्वदा वर्तते इति तेषां तत्सिद्धान्तः। कार्यरूपस्यास्य प्रपञ्चस्य जडरूपत्वादस्य कारणमपि जडा प्रकृतिरेव, सत्त्वरजतमसां साम्यावस्थारूपेयं कृतिः चेतनपुरुषसान्निध्यमहदादिरूपेण परिणमत इति सांख्याः प्रतिपादयन्ति। अतोऽत्र सृष्टिरचनायां प्रकृतिपुरुषयोर्भिन्नः कश्चनईश्वरो नापेक्षितः।

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।
पुरुषस्य तथात्मानं प्रकाशय विनिवर्तते प्रकृतिः॥[1]

इतीश्वरकृष्णोक्त्या पुरुषस्य भोगाऽपवर्गार्थ प्रवृत्ता प्रकृतिकृतप्रयोजना सती नर्तकीव यदा निर्वतते, तदा तेन पुरुषेण संसारलयोऽपवर्गश्च प्राप्यते। तस्मादत्र प्रपञ्चविलये जीवस्य विमोक्षणे वा नेश्वरस्यावश्यकता प्रतीयते।

ननु प्रकृतिस्तु जडा। तादृशप्रकृतौ प्रयोजनासम्भवात् कथं जीवविमोक्षायणाय प्रकृतेः प्रवृत्तिरिति चेन्न, अचेतनायामपि प्रवृत्तिसम्भवात्। तदुक्तमीश्वरकृष्णेन-

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥[2]

अस्यायमर्थः-यथाऽचेतनमपि क्षीरं वत्सविवृद्ध्यर्थ प्रवर्तते, एवमचेतनापि प्रकृतिपुरुषविमोक्षणाय प्रवर्तिष्यत इति।

यदि प्रकृतेः प्रवृत्तावीश्वरः सञ्चालकरूपेण स्वीक्रियते, तर्हि तादृशचेतनस्य प्रवृत्तिः किमुद्देश्येन? किं स्वार्थेन, उत करुणया? नाद्यः ईश्वरस्य नित्यतृप्तत्वात्। नापि द्वितीयः, सृष्टेः प्राग् जीवानां शरीराद्यभावेन तत्कृतबन्धनाभावात् तद्बन्धप्रहाणेच्छारूपा ईश्वरकरुणा कथं वा कल्पते। सर्गानन्तरं दुःखिनो जीवानवलोक्य तत्प्रहाणेच्छारूपा करुणा सम्भवत्येवेश्वर इत्यप्ययुक्तम्, तथा सति कारुण्येण सृष्टिः सृष्ट्या च कारुण्यमिति दुरुद्धरोऽयमन्योन्याश्रयः। तदुक्तं माधवाचार्यैः - 'स किं सृष्टेः प्राक् प्रवर्तते, सृष्ट्युत्तरकालं वा? आद्ये शरीराद्यभावेन दुःखानुत्पतौ जीवानां दुःखप्रहाणेच्छानुपपत्तिः। द्वितीये

---

* सांख्ययोगविभागाध्यक्षः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

1. सांख्यकारिका, 59
2. तत्रैव, 56

परस्पराश्रयप्रसङ्गः, करुणया सृष्टिः सृष्ट्या च कारुण्यमिति'[1]इति।

किञ्च, करुणया ईश्वरः सृष्टौ प्रवर्तते चेत्, सर्वानपि एव सृजेत्। तथा सति सृष्टिवैचित्र्यभङ्गप्रसङ्गः, प्रत्यक्षविरोधापत्तिश्च। यदि च प्राणिनां शुभाऽशुभकर्मवैचित्र्यात् सृष्टिवैचित्र्यमित्युच्यते, तर्हि तादृशशुभाशुभकर्मसाहाय्येन प्रकृतिरेव प्रपञ्चस्य कर्त्रीति स्वीकारे ईश्वरस्त्वन्यथासिद्धः। प्रकृतेः प्रवृत्तौ न स्वार्थं न वा कारुण्यं प्रयोजनकम्, किन्तु पारार्थ्यमात्रमिति नोक्तदोषप्रसङ्गः। तदुक्तं वाचस्पतिमिश्रैः- 'करुणया प्रेरित ईश्वरः सुखिन एव जन्तून् सृजेन्न विचित्रान्। कर्मवैच्त्र्याद्वैचित्र्यमिति चेत्, कृतमस्य प्रेक्षावतःकर्माधिष्ठानेन. तदनधिष्ठानमात्रादेवाचेतनस्यापि कर्मणः प्रवृत्त्युपपत्तेः, तत्कार्यशरीरेन्द्रियविषयानुत्पत्तौ दुःखानुत्पत्तेरपि सुकरत्वात्। प्रकृतेस्त्वचेतनायाः प्रवृत्तेर्न स्वार्थानुग्रहो न वा कारुणयं प्रयोजकमिति नोक्तदोषप्रसङ्गः। पारार्थ्यमात्रं तु प्रयोजकमुपपद्यते।'[2] इति। पारार्थ्यमात्रं नाम परस्य अर्थः परार्थः, तस्य भावः पारार्थ्यम्, पारार्थ्यमेव पारार्थ्यमात्रम्, इति व्युत्पत्त्या परोऽर्थात् पुरुषः तस्य योऽर्थः प्रयोजनं (मोक्षः) तदर्थं तदर्थमात्रमित्यर्थः।

तस्माद् यद्व्यतिरेकेऽनिष्टप्रसजनं तद्वस्तु प्रामाणिकं भवतीति व्याप्तिः। यद्व्यतिरेके च नानिष्टप्रसक्तिस्तद्वस्तु नाङ्गीक्रियते। केवलं तद्वाचकशब्दव्यवहारमात्रं भवति।यथा शशशृङ्गम्, गगनारविन्दमित्यादिः। अत एव कारणेत्वग्रहे व्यतिरेकस्य प्राधान्यमामनन्ति तर्कविदः। तथा चेश्वरव्यतिरेकसृष्टेः, अपरस्य वा कस्यापि कार्यस्य व्यतिरेकव्यतिरेकाद् ईश्वरव्यतिरेके नेष्टव्यतिरेकः। अतस्तस्य प्रामाणिकत्वाभावात् सांख्यमते नेश्वरसद्भावः, तत्प्रयोजकीभूतहेतोरभावात्। अत एवाद्यावधि तद्विषये दार्शनिकानां परस्परं विवादो विलसत्येव। कामं क्रियतां बुद्धिव्यायामस्तेन नहि तत्सद्भावसम्भावनापि। नह्यत्यन्तनिपुणेनापि कृतप्रयत्नेन नटेन घटः पटयितुमिष्यते। न वा शर्करा लवणीक्रियते। न वा दिवान्धो दिवा रूपग्राहकः सम्पाद्यते। अतो बहुकल्पितपदार्थवन्मनोरथकल्पित एवेश्वरपदार्थ इति सांख्यदृष्ट्या निरूपयितुं शक्यते। एवं सांख्यसिद्धान्ते सृष्ट्यर्थम्, जीवस्य विमोक्षार्थं वा ईश्वरो नाङ्गीकृत इति सांख्यदर्शनं निरीश्वरसांख्यमिति हि प्रथितं लोके।

तत्र भवता महर्षिणा कपिलेन -''ईश्वरासिद्धेः, मुक्तबद्धयोरन्यतराभावान्न तत्सिद्धिः, उभयताऽप्यसदकारत्वम्, मुक्तात्मनः प्रशंसा उपासनासिद्धस्य वा'' इति चतुर्भिः[3]सूत्रैरीश्वराङ्गीकारो निषिद्धः। तत्र प्रथमसूत्रेणेश्वरनिषेधः प्रतिज्ञातः। द्वितीयेन सूत्रेणचेश्वरास्तित्वे स किं मुक्तपुरुषान्तर्गतः, उत बद्धपुरुषान्तर्गत इत्याक्षेपः कृतः। तृतीयेन सूत्रेण चेश्वरास्तित्वे स किं मुक्तपुरुषान्तर्गतः, उत बद्धपुरुषान्तर्गत इत्याक्षेपः कृतः। तृतीयेन सूत्रेण मुक्तपुरुषान्तर्गतत्वे सृष्ट्याप्रयोजकाभिमानाद्याभावान्न तेनेश्वरेण सृष्टिसम्भवः, बद्धपुरुषान्तर्गतत्वे चास्य मूढत्वान्न सृष्ट्यादिक्षमत्वमित्युभयथाप्यनुपयुक्तत्वं प्रतिपाद्य चतुर्थेन सूत्रेणेश्वर-प्रतिपादकवचनानां मुक्तात्मनां प्रशंसापरत्वेन नेयत्वं व्यवस्थापितम्।

---

1. सां. द. पृ. 644-645
2. सां. त. कौ. पृ. 464-466
3. सा. सू., 1.92-95

पुनश्च –'प्रमाणाभावान्न तत्सिद्धिः, सम्बन्धाभावान्नानुमानम्, श्रुतिरपि प्रधानकार्यत्वस्य'[1] इति सूत्रत्रयेण ईश्वरास्तित्वे न प्रत्यक्षं प्रमाणं सम्भवति, इन्द्रियैः साकं सन्निकर्षाभावात्। नानुमानमपि, साध्यहेत्वोः सहचारादिदर्शनरूपप्रत्यक्षोपजीव्यत्वादनुमानस्य। न श्रुतिरपि 'अजामकां लोहितशुक्लकृष्णां वह्वीः प्रजाः सृजमानां सरूपाः'[2] इति श्रुत्या प्रकृतेरेव जगत्स्रष्टृत्वस्य प्रतिपादितत्वात्, इतीश्वरसत्तायां प्रमाणभावोऽपि प्रदर्शितो महर्षिणा कपिलेन।

अत्र सूत्रकारस्य महर्षेराशयो विज्ञानभिक्षुणा ईश्वरसाधनपरत्वेन व्यवस्थाप्यते। तथा हि- 'अयं चेश्वरप्रतिषेध एकदेशिनां प्रौढवादेनैवेति प्रागेव प्रतिपादितम्, अन्यथा-हीश्वराभावादित्येवोच्यत'[3]इति। अस्यायमाशयः – नैभिः सूत्रैरीश्वरखण्डेन सूत्रकाराभिप्रायः। यद्येवं स्यात् तदा ईश्वराभावाद् इत्येवं सूत्रयेत, न तु 'ईश्वरासिद्धेः' इत्याकारकं सूत्रं रचयेत्। तस्मान्न महर्षिणा ईश्वरास्तित्वं निषेधितम्, नेश्वराभावः साधित इति।

डॉ. या. कु. मसीहमहाशया विज्ञानभिक्षोर्वचनमसङ्गतमिति प्रतिपादयन्ति। महर्षिणा ईश्वरास्तित्वं खण्डितम्, न तु तस्याभावः साधित इत्यनयोर्भेदाऽभावात्। ईश्वरास्तित्वखण्डनेनैव तद्भावः सुतरां साधित इति पूर्वोक्तो विज्ञानभिक्षोस्तर्को नेश्वरसाधनसमर्थो भवति।[4]

श्रीमन्त उदयवीरशास्त्रिमहाभागाः सांख्यसूत्रेषु महर्षिणा कपिलेन जगदुपादानभूतस्यैवेश्वरस्यासिद्धिः कृता, न तु सर्वथा ईश्वरासिद्धिरिति प्रतिपादयन्ति। तथाहि-प्रथमाध्याये जगदुपादानभूतस्येश्वरस्यासिद्धिः- प्रतिपादिता। जगदुत्पादानादभूत ईश्वरः केनापि प्रमाणेन साधयितुं न शक्यः सांख्यनये, प्रकृतितत्त्वस्य सत्त्वरजस्तमोमयस्य तत्र जगदुपादानत्वस्वीकारात्। अत्र पुनस्तृतीयाध्याये सर्वजगदधिष्ठाता सर्वनियन्ता परमेश्वरः प्रतिपादयते। एवम्भूतस्य जगत्कर्तुरीश्वस्य सिद्धिनिश्चिता एवेति। अनयैव रीत्याऽनयोः प्रसङ्गयोराशङ्क्यमानोविरोधः शक्यः परिहर्तुम्। अत एव पञ्चमाध्याये परमेश्वरस्याधिष्ठातृत्वं प्रतिपाद्य 'श्रुतिरपि प्रधानकार्यत्वस्य'[5]इत्युपसंहारसूत्रेण प्रकृतेरेव जगदुपादानत्वं प्रत्यपादयत् सूत्रकारः।

अत एव 'ईश्वरासिद्धेः'[6] इत्यादिसूत्रदिशापरमेश्वरस्य जगदुपादानत्वं प्रतिषिध्य तत् सन्निधानादधिष्ठातृत्वं मणिवत्'[7] इति प्रकरणोपसंहारसूत्रेण कपिलश्चेतनस्य सर्वजगन्नियन्तुः परमेश्वरस्यैवजगदधिष्ठातृत्वं प्रत्यष्ठापयत्। सप्तदशसंख्याङ्कितकारिकाव्याख्याने 'अधिष्ठानात्' इति हेतु विवृण्वन् माठरः –'ततः पश्यामोऽसौ परमात्मा अस्ति पुरुषो येनाधिष्ठितं महदहङ्कारतन्मात्रेन्द्रियभूतान्युत्पादयति' इत्युपपादयत्।अस्यैव हेतुपदस्य व्याख्याने माठरगौडपादावुभावपि पञ्चशिखसूत्रमेकमित्थमुद्धरतः – 'पुरुषाधिष्ठितं प्रधानं प्रवर्तते' इति।

6. सा. सू., 5.10-12
7. श्वे. उ., 4.5
8. सां. सू., 1.92 प्रवचनभाष्यम्।
9. निरीश्वरवाद भारतीय एवं पाश्चात्य, पृ. 49-53
10. सां. सू., 5.12
11. सां. सू., 1.92
12. सां. सू., 1.96

पुरुषपदं हि सांख्ये पारिभाषिकं चेतनमात्रपरम्। पूर्वोक्तरीत्या नहि चेतना जीवात्मा मूलप्रकृतेरधिष्ठाता भवितुमर्हति। एवं च चेतनाधिष्ठितप्रधानस्य प्रवृत्तिं व्याचक्षाणः पञ्चशिखः सकलजगदधिष्ठातारं परमात्मानमेवोपपादयति। कापिलैश्चेतननिरपेक्षा प्रकृतिः प्रवर्तते इति मतं नाङ्गीक्रियत एव। एवं कपिलनाम्ना तादृशमतमाश्रित्य तन्निराकरणं यद्भगवानाचार्यःशङ्करश्चकार सर्वत्र ब्रह्मसूत्रभाष्ये, तत्सर्वं निराधारमेव सञ्जायते[1]इति।

नन्वेवं सति 'कपिलो निरीश्वरवादी'इति प्रवादो बहोः कालात् कथमिव प्रवर्तित इत्याकाङ्क्षायां श्रीमन्त उदयवीरशास्त्रिण एवमभिप्रयन्ति - सांख्याचार्यपरम्परायां वार्षगण्याख्योऽस्ति प्रसिद्धोऽतिप्राचीनः आचार्यः। तेन च षष्टितन्त्राख्यो ग्रन्थो विरचितः। सांख्याचार्योऽप्ययं मतमेवमुद्धृतं वर्तते-'प्रधानप्रवृत्तिरप्रत्यया पुरुषेणाऽपरिगृह्यमाणाऽऽदिसर्गे वर्तते' इति। एतेन वार्षगण्याचार्यः प्रधानप्रवृत्तिं प्रति चेतना नाङ्गीकरोतीत्यवगम्यते।

कालान्तरे सर्वात्मना निरीश्वरवादिनो बौद्धाः स्वमतपोषणायवार्षगण्यमतं सांख्यमतमिति कृत्वा प्रचारितवन्तः प्रसारितवन्त श्च। रहस्यमिदमजानद्भिर्जनैः सांख्यस्येदं मतमेव तदादिवक्तुः कपिलस्य मतमित्यारोपितम्। तदाप्रभृत्येवायं प्रवादः प्रवर्तितः 'कपिलो निरी श्वरवादी' इति। अतो भगवतपादैः शङ्कराचार्यैः प्रत्याख्यातं सांख्यमतं सांख्यान्तर्गत-वार्षगण्यशाकारूपम्, न तु कापिलमिति निश्चप्रचम्।[2]

वस्तुतस्तु द्विविधा हि सांख्यविचारधारा प्रवहन्ती दृश्यते-से श्वरसांख्यधारा,निरीश्वरसांख्यधारा चेति।एतच्च विज्ञानभिक्षुणापि स्वीकृतम्। तेन चोक्तं तेन 'अयं चेश्वरप्रतिषेध एकदेशिनां प्रौढिवादेनैव इति।[3]

अत्र सेश्वरसांख्यानामपीश्वरो न नैयायिकाभिमतेश्वर इव नित्यसर्वज्ञत्वादिगुणयुक्तः, न वा प्रपञ्चकर्तृत्वसामर्थ्यवान्, किन्तु प्रकृतिप्रतिबिम्बतत्वात् पुरुषे सर्ववित्त्वसर्वकर्तृत्वाभिमानवान्। एतादृशाभिमानयुक्तः पुरुष एवे श्वरः। तदुक्तं वृत्तिकारेण - यद्यस्मदभिमत आत्माई श्वरः, भवतु न्यायाभिमते च प्रमाणं नास्ति[4] इति। एवं सांख्याः कर्तारमेश्वरं निषेधयन्ति, न तु कर्तृत्वाद्यभिमानिनमात्मानमी-श्वरमिति ज्ञायते। 'स द्विविधः, परश्चापरश्च'[5] इति वृत्तिकारेणात्मनः परापरभेदेन द्वैविध्यं प्रतिपाद्य पर एवात्मा ईश्वर इति निरूपितम्।

तस्मात् सेश्वरसांख्याभिमतेश्वरे सर्वज्ञत्वसर्वकर्तृत्वादीनामवास्तविकत्वादत्र न सङ्कल्पपूर्वकं स्रष्टृत्वम्, किन्तु लौहसञ्चालनेऽयस्कान्तमणेरिव सन्निधानमात्रेणैव। तदुक्तं

---

1. सां. सू., व. 15, अंक 1-4, पृ. 106-108
2. तत्रैव, 108-109
3. सां. सू., 1.92
4. सां. सू. अ. वृ. 3.57
5. तत्रैव, 2.1

महर्षिणा कपिलेन -'तत्सिन्निधानादधिष्ठातृत्वं मणिवद्'[1] इति। विज्ञानभिक्षुणाऽप्युक्तम्-

निरिच्छे संस्थिते रत्ने यथा लोहः प्रवर्तते।
सत्तामात्रेण देवेन तथा चायं जगज्जनः।।
अत आत्मानि कर्तृत्वमकर्तृत्वं च संस्थितम्।
निरिच्छत्वादकर्ताऽसौ कर्ता संन्निधिमात्रतः।।[3]

अत एवात्र 'तदैक्षत बहुस्यां प्रजायेय'[3]इत्यादिश्रुतिस्तु कूलं पिपतिषतीतिवद् गौण्या वृत्या प्रवर्तते। तदेतावता पर्यालोचनेनेदमेव ज्ञायते यत् सांख्यदर्शने सेश्वरनिरीश्वरभेदेन द्वौ पन्थानौ वर्तते। ये चेश्वरं नाङ्गीकुर्वन्ति, ते पुरुषस्य सान्निध्यमात्रेण प्रकृतेः सृष्टिकर्तृत्वादिकं व्यवस्थापयन्ति। ये चेश्वर-मङ्गीकुर्वन्ति, ते त्वीश्वरसान्निध्येन प्रधानस्य व्यापारमुपवर्णयन्ति। सेश्वरवादिनामपीश्वरो न्यायदर्शनाभिमते श्वरवन्न नित्यः, तस्य नित्यत्वे सर्वसम्मत्यभावात्। अतो जन्य इत्येवाङ्गीक्रियते। तदुक्तं विज्ञानभिक्षुणा-'प्रकृतिलीनस्य जन्येश्वरस्य सिद्धिः,' 'यः सर्वज्ञः स सर्ववित् यस्य ज्ञानमयं तपः'[4]इत्यादिश्रुतिभ्यः सर्वसम्मतैव, नित्येश्वरस्यैवविवादास्पदत्वादित्यर्थः[5]इति। अस्य च सङ्कल्पेन सृष्टिरित्यङ्गीकारे सङ्कल्पप्रयोजकस्य स्वार्थत्वे ईश्वरत्वहानिः, कारुण्ये सृष्टिवैचित्र्याभाव इति सान्निध्यमात्रेणैव सृष्टिः प्रतिपाद्यते।

तत्र तावद्योगदर्शने समाधिसिद्धिरेव योगिनां चरमं लक्ष्यम्। स च समाधिः कैरुपायैः प्राप्यत इति जिज्ञासायामष्टाङ्गयोगः प्रोक्तः। भाष्यकारस्तत्रैव एव शङ्कामुद्भावयति-'किमेतस्मादेवासन्नतरः समाधिर्भवति ? अथास्य लाभे भवत्यन्योऽपिकश्चिदुपायो न वेति'[6] इति। तदा प्राह पतञ्जलिः -'ई-श्वरप्रणिधानाद्वा'[7] इति। अस्यामर्थः -अत्र प्रणिधानो नाम भक्तिविशेषः। स च फलेप्साराहित्येन क्रियमाणानां कायिकवाचिका-मानसिकक्रियामाणामीश्वरार्पणरूपः। तदुक्तं भगवता कृष्णेन-

यत्करोषि यदनासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्।।[8]

एतादृशभक्तिविशेषेण अवर्जितः प्रसन्नतापूर्वकमभिमुखीकृत-ईश्वरोऽभिध्यानमात्रेण इदमस्माभि-मतमस्त्विति सङ्कल्पमात्रेणैव तं योगिनमनुगृह्णाति। तदनुग्रहाद् योगिनाम् मतिशीघ्रमेव समाधिफलं कैवल्यं सिद्ध्यतीति।

---

1. सां. सू., 1.16
2. सां. सू., 1.96 प्रवचनभाष्यम्।
3. छा. उ. 6.2.3
4. मुण्ड. 1.1.9
5. सां. सू., 3.57 प्रवचनभाष्यम्।
6. यो. सू., 1.23 अवतरणिकाभाष्यम्
7. यो. सू., 1.24
8. भ. गी. 9.27

ISSN - 0974-8946
जनवरी-मार्च, 2019

शोधप्रभा
वर्ष: 44, प्रथमोऽङ्क:

विहंगमदृष्ट्या ईश्वरविमर्श:

डॉ. अनिलानन्द:*

अनादिकालत: एव प्राणिनाम् अभिलसितं यत् कथं दु:खनिवृत्ति: आनन्दावाप्तिश्च भवेदिति। एतदर्थमेव मनसि निधाय परमकरुणावरुणालया अस्माकं ऋषय: स्वाभिमतानि प्रकाशितवन्त:। तानि ऋष्यभिमतानि अनुसृत्य प्रवृत्तं दर्शनानाम् पारम्पर्यम्। तदनुसारं प्रत्यभिज्ञादर्शनाख्या परम्परापि प्रकाश प्राप्ता। दर्शनस्यास्य उज्जीवक आचार्य ''उत्पलदेव:'' ईश्वरप्रत्यभिज्ञा इति शास्त्रं प्रणिनाय। तदिदं दर्शनं शैवाद्वैतदर्शनं ''स्वातन्त्र्यदर्शनं प्रत्यभिज्ञादर्शनं त्रिकदर्शनम्''[1] इति नामभिश्च लोके ख्यातिं गतम्। जीवेश्वरयोरेकत्वप्रतिपादनपरत्वात् दर्शनमिदं शैवाद्वैतनाम्नाभिधीयन्ते। शिवस्यैव स्वातन्त्र्य-निरूपणपरत्वाच्च स्वातन्त्र्यदर्शनमित्यभिधीयते। शिवस्यैव च प्रत्यगभिन्नतया प्रत्यभिज्ञापनाय प्रत्यभिज्ञा-दर्शनमुच्यते शक्तिशक्तिमदभिन्न शिव एव पाशपशुपतित्वेन दर्शनेऽस्मिन् वर्ण्यते अत एव त्रिकदर्शननाम्नापि लोके ख्यातिं गतं दर्शनमिदम्। ''यथाद्वैतवेदान्ते ब्रह्म-जीव-मायाख्यानि त्रीणि तत्त्वानि विक्रियन्ते तद्वदेव इहापि ईश्वर-जीव-प्रकृति नामानि तत्त्वानि एकस्यैव शिवस्य पशुपतिपशुपाशनाम्न: निदर्श्यन्ते।''[2]

इह खलु चिन्मात्रस्वभावपरमशिव एव पूर्णत्वात् निराक्षोऽपि स्व-स्वातन्त्र्यमाहात्म्यात् बहिरुल्लिसिषया परानन्दचमत्कारतारतम्येन पुरा प्रथमम् अहमिति-परामर्शतया शक्तिदशामधिशयान: प्रस्फुरेत् इति संभाव्यते। अनन्तरं च अहम्-इदम्। इति परापर्शरूपशाखद्वयम् अवभासयेत। तत्र च शुद्धचिन्मात्राधिकरण एव अहमित्यंशे यदा परमेश्वर: इदमंशम् उल्लमासयति, तदा तस्य प्रोन्मीलित-मात्र चित्रकल्पभावराशिविषयत्वेनास्फुटत्वात्, इच्छाप्रधानं सदाशिवतत्त्वम्, अहमिदम्- इति भावराशै पुन: स्फुटिभूते तदधिकरण एव इदमंशे यदा अहमंशं निषिञ्चति अभिनिवेशते, तदा ज्ञानशक्तिप्रधानम्-ईश्वरतत्त्वम् इदमिति, अत एव च अहं विमर्शस्य अविशेषेऽपि अत्र इदमंशस्य अस्फुटत्व-स्फुटत्वा-भ्याम् अयं विशेष:। यदा पुन: प्ररूढभेदभावराशिगतेदमंशस्फुरणे चिमात्रगतत्वेन अहम् अंश: समुल्लसति, तदा द्वैतवादिनामिव ईश्वरस्य य: समधृततुलापुटन्यायेन अहमिति परामर्श: तत् क्रियाशक्तिप्रधानं विद्यातत्त्वमिति विभाग: यद्यपि परमशिवस्यैव इदमेकधनमैश्वर्यं तथापि तस्य यथा बहिरौन्मुख्येन।

---

* सहायकाचार्य: - वेदान्तविभाग:, श्रीरंगलक्ष्मी आ. सं. म. वि. वृन्दावनम्, मथुरा

1. भूमिका - ईश्वरप्रत्यभिज्ञा
2. सर्वदर्शनसंग्रह: - बलदेव उपाध्याय:
3. रुदे

इत्येन-प्रकारेण निराकांक्षतया अहन्तेदन्ता प्रतिभासविरहेपि विसर्गशक्त्यौन्मुख्येन उन्मेषात्मनौ प्रसरस्थिती जुषतः अवस्थातारतम्य- उद्भासनेन चमत्कुर्वतः, तत्र उन्मेषेण स्वान्तर्गतशक्तिभागस्य शिवभागात् पृथग्भासनेन प्रसरणं शिवदिक्षित्यन्ततत्त्वभावेन संचारः, निमेषेण पुनः शक्तिभागस्य स्वान्तः संयोजनेन अवस्थितिः। एवं भूतात् चिदानन्दमयात् स्वरूपात् अत्थतिरिक्ततया पूर्णाहन्तोद्भावनपूर्वयवमास्यां निजकलां स्व-स्वातन्त्र्यशक्तिं विभक्तुं विच्छित्या भासयितुं यत् शक्तिसामस्य युगलस्वरूपं सदाशिवेश्वरादि तत्त्वदशामाशास्ते अर्थात् स्वातन्त्र्यमहिम्नैव उपादानादि सामग्री निरपेक्षं प्रकाशमात्रं सारतमा स्वस्मात् अविभिन्नमपि-भिन्नमिव दर्पणनगरवत् विश्ववैचित्र्यचित्रम् उन्मीलयति, तदा द्विधा इतं इति द्वितं तदेव द्वैतं तदभाववत् अद्वैतम्, वस्तुतः रहितम्। अथवा द्वाभ्यामितं द्वितं तत्र भवं द्वैतं संशयविपर्ययादिज्ञानं तद् वर्णितं, निखिलं विश्वनिर्भरतया परिपूर्णदेहादिपरिमितम् इति शंकानिवृत्यर्थं श्रुतिप्रमाणं प्रथमं- अभ्यस्यापारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महियान्। शुक्रेण ज्योतिषम्, समनुप्रविष्टः प्रजापतिः चरति गर्भे अन्तः। ''रुद्रे-[1]'' अपारे-अम्भसि-समुद्रे यो रुद्रो अग्नौ य अप्सु च औषधीषु यो रुद्रो युवनान्याविवेश तस्मै रुद्राय नमो अस्तु-इति श्रुतौ। एतद्वाक्यार्थः स्पष्टमुपदिश्यते। अतः न विष्णुपरत्वमयोपक्रमवाक्यस्य सिद्धयति। भुवनस्य मध्ये लोकस्य मध्ये-इत्यर्थः। नाकस्य पृष्ठे सर्वोर्ध्वभागे आकाशादिभ्यो महानित्यर्थः। शुक्रेण-स्वतेजसा, ज्योतिषि-सूर्यादि ज्योतिषि। अनुप्रविष्टः अन्तर्यामित्वेन स्थित्वा प्रकाशयतीति भावः। तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"[2] तच्छुभ्रं ज्योतिषां ज्योतिस्वत्तदात्मविविदुरित्यादि[3] श्रुतिषु तथा श्रूयते। गर्भे अन्ते - गर्भमध्ये संचरतीत्यर्थः। सर्वजीवान्तर-सृष्टिकारणभूतचतुर्मुखस्य परमेश्वरगर्भचालनव्यपदेशस्तस्य, स्थावरजंगमात्मकसर्वप्रपञ्चाधिष्ठानत्वं समुद्रादि-सर्वस्थलस्थिति व्यपदेशेन सर्वात्मकत्वं सर्वान्तर्यामित्वं योपदिष्टं भवति। तथा श्वेताश्वतरेऽपि-''सर्वाननशिरोग्निवः सर्वभूतगुहाशयः। सर्वव्यापि च भगवान् तस्मात् सर्वगतः शिवः''[4] इति। ''पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यतेति[5]'' बृहदारण्यके च। अथवा-अपारे - अम्भसि। महाप्रलये वटरूपेण विवसन् शशिशेखरः स्वशाखाग्रस्थिते पर्णे हरिं धत्ते कृपानिधिरिति। शैवपुराणवचनरीत्या तत्र वटरूपेण स्थिति इत्यर्थः। भुवनस्य मध्ये इत्यर्थः अन्तरिक्षे सूर्यात्मनावर्तत इत्यर्थः। तथाशतरुद्रीये- असौ योऽवसर्पपति, नीलग्रीवो विलोहितः। नाकस्य पृष्टे सर्गादुर्ध्वभागे। इदं वैकुण्ठादीनामुपलक्षणं महाकैलाश- इत्यर्थः। ''परात्परतरं ब्रह्म तत्परात् परतो हरिः। यत् परात्परवरतो- ईशस्तन्मे मनः शिवसंकल्पमस्तु''[6] इति श्रुत्यन्तरे। शिवस्य सर्वदेवताधिकत्वम्। व्यपदेशान्तन्निवासभूत-महाकैलासस्य सर्वोर्ध्वभागस्थितिरनवद्यतेति भावः तथा भगवता व्यासेन स्कान्द-लैंग्यादिषु बहुधा प्रपञ्चितम्। "महतो महियान्"[7] सर्वदेवता ब्रह्मा विष्णु महेन्द्राणामधिप इत्यर्थः। तथा श्वेताश्वतरे

1. कठोषनिषद्
2. कठोषनिषद्
3. ईश्वरप्रत्यभिज्ञा
4. बृहदारण्यकोपनिषद्
5. महानारायणोपनिषद्
6. श्वेताश्वेतरो०
7. श्वेताश्वेतरो०

''तमीश्वराणां परमं महेश्वरं तं देवतानां परमञ्च दैवतं पतिं पतीनां'' परमं (शिव) परस्तात्। विदामदेव भुवनेशमिद्ध्यं। न तस्य कार्यं करणं च विद्यते। न तत् समश्चाप्यचिकश्चदृश्यतेति'' श्रूयते। अहमेकः प्रथममासं वर्तामि च सूर्यादिज्योतीषि प्रकाशयतीत्यर्थः चतुर्मुखस्यापि जनकस्तथा। यो देवानां प्रथमश्चोद्भवश्च, विश्वधिको रुद्रो महर्षि, हिरण्यगर्भं पश्यत् जायमानं सनो देवश्शुभयास्मृत्या संयुनक्तु नारायणो च देवानां प्रथमं पुरस्तात् विश्वधियो रुद्रो महर्षिः। हिरण्यगर्भ पश्यत् जायमान सवोदवः शुभया स्मृत्या संयुनक्तु।''[1]

स एव आनन्दघनतया समुच्छलत्वभावः स्वेच्छ्यैव स्वस्यादेव निरुपादानसहकारिकारणादिसम्भारं विश्वक्रीडामुद्भिभासचिष्यत स्व-स्वातन्त्र्येण शुद्धमिन्त्रूपेणि परस्परापोहनेन अवभामानानि मातृमेयादीनि तत्सम्बन्धश्च कार्यकाल भाव वैचित्र्यादीन, दर्पणप्रतिबिम्बवदनतिरिक्तान् अतिरिक्तवद् अवभासयति स्वात्मनि एव देशकालाद्युपहितान्। निर्भासितां च तेषां कालाद्यकलितः स एव पारमार्थिक स्वभाव इति वस्तुतो हि सृज्यते स्वप्यते संहृयते चेति। आनन्दघर्नाश्चदाकाश एव पूर्णतापूर्णतस्तथा पूर्णमानश्चकास्ति-इति।

1. महानाराणोपनिषद्

ISSN - 0974-8946 **शोधप्रभा**
जनवरी-मार्च, 2019 वर्षः 44, प्रथमोऽङ्कः

नैषधमहाकाव्यटीकाकाराणां न्यायवैशेषिकदृष्टिः

डॉ. जीवनकुमारभट्टराई

विविधशास्त्रपारङ्गतः श्रीहर्षः भारतीयदार्शनिक-चिन्तनपरम्परायामपि निष्णात आसीत्। नैषधीयचरिते विविधभारतीयदर्शनानां ज्ञानं पदे-पदे सम्प्राप्यते। यत्र कविना श्रीहर्षेण काव्ये प्रसङ्गवशात् किमपि दार्शनिकं चिन्तनं सङ्केतितम्, तत्र-तत्र नैषधीयचरितस्य प्रमुखटीकाकाराणां तत्तच्चिन्तनं शास्त्रोक्तरीत्या समुद्घाटितम् इति तेषां वैशिष्ट्यं सर्वत्र दरीदृश्यते। अत्र न्यायवैशेषिकदर्शनसिद्धान्तमाश्रित्य टीकाकाराणां वैशिष्ट्येन साकं कानिचन प्रमुखानि उदाहरणानि प्रस्तूयन्ते।

नैषधीयचरितमहाकाव्ये श्रीहर्षेण न्यायदर्शनस्य कारणतावादस्य चर्चा बहुत्र विहिता। न्यायदर्शनानुसारं कार्यं कारणे विद्यमानो न भवति अर्थात् कार्यसत्ताया आरम्भः तस्योत्पत्त्या सह एव सम्भवति। यथोक्तं उदयनाचार्येण-

अनन्यथासिद्धनियतपूर्वभावित्वं कारणत्वम्।[1]

''कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्। यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम्। यथा- तन्तवः पटस्य पटश्च स्वगतरूपादेः।''[2]

कारणभावात्कार्यभावः।[3]

उत्पत्तिधर्मस्य द्रव्यस्य गुणाः कारणात् उत्पद्यन्ते।[4]

कारणं कार्यस्य अनन्यथासिद्धनियतपूर्ववृत्तिरस्ति। अर्थात् यत् नियतरूपतया कार्यस्य पूर्वं भवति तदुच्यते कारणम्। उपर्युक्तसिद्धान्तस्य चर्चा नैषधीयचरितस्य द्वितीयसर्गे दमयन्तीसौन्दर्यवर्णनप्रसङ्गे सम्प्राप्यते। तद्यथा-

कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः।
स तदुच्चकुचौ भवनप्रभाङ्करचक्रभ्रममातनोति यत्।।[5]

---

* प्रूफसंशोधकः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली-16

1. न्या.कुसुम. 4/1/19, उदयनाचार्यः
2. तर्कसं., पृ.34
3. वै.सू. 4/1/3
4. न्याय.सू. 3/1/25, वा.भा.
5. नैषध.2/32

प्रसङ्गेऽस्मिन् प्रसिद्धटीकाकारौ आचार्यमल्लिनाथनारायणौ स्वस्य-स्वस्य टीकायां न्यायदर्शनस्य कारणसिद्धान्तं प्रकाशयत:। अत्र जीवातुटीकाकार आचार्यमल्लिनाथ: समवायिकारणं प्रदर्शयति। यथा-

''अत्र समवायिकारणगुणा रूपादय: कार्ये संक्रामन्ति न निमित्तगुणा इति।''[1]

तत्रैव नैषधीयप्रकाशकार आचार्यनारायणस्तु अस्मिन् प्रसङ्गे निमित्तकारणं स्वीकुर्वन् विस्मयं प्रकाशयति।

न्यायशास्त्रे- ''समवायिकारणमसवायिकारणं निमित्तकारणं चेति, यत्समवेतमेव कार्यमुत्पद्यते तत्समवायिकारणं, यथा मृत्पिण्डो घटस्य।'' निमित्तकारणमप्यत्र दृश्यते इति विस्मयकरमिदमिति प्रकाशयन् स: कथयति-

''हे राजन्! चक्रभ्रमं करोत्येवंशीलश्चक्रभ्रमकारी तस्य भावश्चक्रभ्रमकारिता तल्लक्षणो गुणा: स्वभाव: (य:) कलसे घटे दृश्यते स निजस्य स्वस्य घटस्य हेतुर्निमित्तकारणं दण्डस्तस्माज्जात: किमु? समवायिकारणगुण: कार्ये गुणमारभते, न निमित्तगुणा:। अत्र तु निमित्तगुण: कार्ये गुणमारभत इति असंभाव्यमेतत्त्वया कुत्रचिद्दृष्टमिति प्रश्नार्थ: 'किमु' मया तु दृष्ट:। कुत्रेत्यपेक्षायामाहयद्यस्मात्स कलसस्तस्या भैम्या उच्चकुचौ भवन्नुच्चस्तनतां प्रपद्यमान: प्रभाझरेण दीप्तिसमूहेन चक्रभ्रमं कुलालचक्रभ्रमणमर्थादृष्टे करोति। सुन्दरवस्तुदर्शनेन कामान्धो भवतीति भाव: अथ च कान्तिप्रवाहो चक्रवाकभ्रान्तिमातनोति (कान्ति) प्रभावे चक्रवाका भवन्ति(भ्रमन्ति) अतो भ्रमकारणत्वाच्छब्द-च्छलाच्चक्रभ्रमकारितागुणो घटे विद्यते। तुङ्गत्वेन कान्तिमत्त्वेन च तत्कुचौ घटचक्रवाकतुल्याविति भाव:। निज: सहजश्चासौ हेतुश्च। समवायिकारणमिति यावत्। तादृशो न भवतीति अनिजहेतुर्निमित्तकारणं तादृशाद्दण्डाज्जात: किमु इत्युत्प्रेक्षा, आक्षेपो वा।''[2]

प्रसङ्गेऽस्मिन् अन्यै प्राचीनटीकाकारैरपि स्वस्य मतं प्रस्तुतं वर्तते-

''अन्यत्र समवायिकारणगताद्गुणात् कार्यगौणोत्पत्ति: अत्र निमित्तकारणाद्दण्डादपि गुणोत्पत्तिराशङ्क्यते।''[3]

प्राचीनटीकाकार: चाण्डूपण्डितस्तु अस्मिन् प्रसङ्गे दण्डम् असवायिकारणं मत्त्वा निमित्तमि च असमवायिकारणे एव सम्मिलितुम् इच्छति- ''निमित्तकारण- सहकारिकारणस्य च द्वयस्याप्य-समवायित्तत्वात्। अत्र घटे चक्रभ्रमकारिता लक्षणो गुणो दृश्यते स च असमवायिकारणद्दण्डाज्जात:।''[4]

न्यायवैशेषिकयो: प्रसिद्धमुदाहरणं 'घट' इत्यस्य विवरणं श्रीहर्षेण अन्यत्रापि भैम्या: रूपसौन्दर्यवर्णनप्रसङ्गे प्रस्तुतम्। यथा हि-

---

1. नैषध. 2/32, जीवातु
2. नैषध. 2/32, नैषधीयप्र.
3. तत्रैव, नरहरि:
4. तत्रैव, चाण्डूपण्डित:

एतत्कुचस्पर्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम्।
तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः॥[1]

पद्यस्यास्य व्याख्यायां टीकाकारेण नारायणेन प्रकाशितं यत्-

''ख्यातस्य प्रसिद्धस्य घटस्य न्यायशास्त्रादिषु 'यत्कृतं तदनित्यं, यथा घटः' इति, 'यन्नित्यं न तदकृतकमपि न, यथा घटः' इत्यन्वयव्यतिरेकाभ्यां निदर्शनत्वं दृष्टान्तत्वमजनि जातम्। प्रसिद्धस्य हि दृष्टान्तत्वम्।''[2]

न्यायदर्शनानुसारं मनःसत्ताविषये वर्णनं प्राप्यते यत्-

'मनः अणुर्वर्तते तथा एकोऽस्ति।'[3] कविना श्रीहर्षेण न्यायदर्शनस्य तथ्यमिदं राजानलस्य अश्वविवरणप्रसङ्गे प्रतिपादितं यत्- ''नलस्य अश्वधावनसमये अश्वैरुत्थापितधूलिः एवं प्रतीयते स्म यथा जनानां मनांसि परमाणुरूपं धृत्वा ताभ्यामश्वाभ्यां वेगातिशयं ज्ञातुं समागताः सन्ति''। यथा हि-

अजस्रभूमीतटकुट्टिनोत्थितैरुपास्यमानं चरणेषु रेणुभिः।
रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः॥[4]

सन्दर्भेऽस्मिन् नैषधीयप्रकाशे(नारायणी) टीकाकारेणोल्लिखितम्-

अणुपरिमाणं मनः' इति तार्किकाः।[5]

उपर्युक्तसिद्धान्तस्य चर्चा कविना तृतीयसर्गे दूतहंसस्य माध्यमेन नलस्य तुरगाणां वेगातिशीलताविवरणेऽपि कृता। यथा हि-

विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः।
मनोभिरासीदनणुप्रमाणैर्न लङ्घिता दिक्कतमा तदश्वैः॥[6]

टीकाकार-आचार्यमल्लिनाथस्य कथनेन प्रदत्ततथ्यस्य स्पष्टतया प्रकाशनं भवति। तद्यथा-

''अणुप्रमाणैः 'अणुपरिमाणं मनः 'इति तार्किकाः, तद्विपरीतैर्महापरिमाणैर्मनोभिर्वैनतेयादि-समानवेगैरित्यर्थः। एवविधैः तदश्वैः कतमा दिक् न लङ्घिताऽऽसीत्? सर्वापि लङ्घितैवासीदित्यर्थः।''[7]

---

1. नैषध. 7/75
2. तत्रैव, नैषधीयप्र.
3. द्र.न्या.सू. 3/2/56
4. नैषध. 1/59
5. तत्रैव, नैषधीयप्र.
6. नैषध. 3/37
7. तत्रैव, जीवातु

अन्यत्रापि देवर्षिनारदद्वारा इन्द्रेण सह भैम्या पुरुषविशेषानुरागवर्णनप्रसङ्गे मन:परमाणुरूपस्य चर्चा प्रस्तुता श्रीर्षेण-

यत्पथावधिरणुः परमः सा योगिधीरपि न पश्यति यस्मात्।
बालया निजमनःपरमाणौ ह्रीदरीशयहरीकृतमेनम्॥[1]

प्रसङ्गेऽस्मिन् द्वयोष्टीकाकारयोः मतं स्पष्टमस्ति-

मल्लिनाथः- ''बालया निजमन एव परमाणुः। अणुपरिमाणं मनः इति सूत्रात् तस्मिन् ह्रीरेव दरी गुहा तच्छयहरीकृतं तद्गतसिंहीकृतम् एनं युवानं यस्मान्न पश्यति तस्मान्न कथ्यत इति पूर्वेणान्वयः। योगिबुद्धेरपि परमाणुस्वरूपग्राहित्वमेव नान्तःप्रवेशे शक्तिरित्यज्ञानादकथनं न कपटात्। सा तु मन्दाक्षमन्थरतया न कथयतीत्यर्थः।''[2]

नारायणः- ''बालया निजःमनपरमाणौ स्वीयमनोलक्षणे परमाणौ ह्रीरेव लज्जैव दरीकन्दरा तस्यां शेते शयो हरिः सिंहस्तत्स्वरूपं कृतम्। 'अणुपरिमाणं मनः' इति तार्किकाः। मन एव योगिबुद्ध्या गृह्यते, न तु तस्था ह्रीस्तस्यां विद्यमानो दूरत इति, सा तु लज्जावशात् कस्याप्यग्रे न कथयतीत्यर्थः। परमाणूनां निरवयवरूपाद्याश्रयत्वं यथा तथा निरवायवह्रीयोऽपीत्यविरुद्धमित्यर्थः।''[3] अनेन वर्णनेन न्यायदर्शने तस्य प्रागल्भ्यं परिलक्ष्यते। सहैव काव्यसन्दर्भे तस्य प्रयोगवैशिष्ट्यमपि सहृदयान् आवर्जयति।

नैषधीयचरितस्य द्वाविंशतितमे सर्गे वैशेषिकदर्शनस्य चर्चा सम्प्राप्यते। तत्र कविना वैशेषिकदर्शनम् औलूक्यदर्शनमिति मत्वा स्वाभिव्यक्तेः प्रतिपादनं कृतम्। तत्रैव टीकाकाराभ्यां मल्लिनाथनारायणाभ्यां वैशेषिकदर्शनस्य सन्दर्भोऽयं टीकयोः विस्तरेण प्रकाशितमस्ति। तत्पद्यं यथा-

ध्वान्तस्य वामोरु! विचारणायां वैशेषिकं चारु मतं मतं मे।
औलूक्यमाहुः खलु दर्शनं तत्क्षमं तमस्तत्त्वनिरूपणाय॥[4]

पद्यस्यास्य मल्लिनाथेन प्रकाशिता विस्तृतटीका-

''ध्वान्तस्य विचारणायां तमःस्वरूपनिरूपणविषये वैशेषिकं मतं षट्पदार्थसाधर्म्यनिरूपणात्मकं काणादं दर्शनं चारु सदुपपत्तिकं, नत्वन्यदिति मे मतं समतम्। खलु यस्मात्कारणात् (संप्रदायविदः) तद्दर्शनं वैशेषिकं शास्त्रम् औलूकमाहुर्वदन्ति अत एव तमसस्तत्त्वनिरूपणानारोपितस्वरूपाणां याथात्म्यदर्शने समर्थ भवति। वैशेषिकमप्युलूकापरनाम्ना कणादमुनिना प्रोक्तमिति युक्तमित्यर्थ इति शब्दच्छलम्..।''[5]

नैषधीयप्रकाशेऽपि अनयैव दिशा पद्यमिदं व्याख्यायितम्:-

1. नैषध. 5/29
2. नैषध. 5/29, जीवातु
3. तत्रैव, नैषधीयप्र.
4. नैषध. 22/35
5. नैषध. 22/35, जीवातु

''ध्वान्तस्य विचारणायां तमःस्वरूपनिरूपणविषये वैशेषिकं मतं षट्पदार्थसाधर्म्यनिरूपणात्मकं काणादं दर्शनं चारु सदुपपत्तिकं, नत्वन्यदिति मे मतं समतम्। खलु यस्मात्कारणात् (संप्रदायविदः) तद्दर्शनं वैशेषिकं शास्त्रम् औलूकमाहुर्वदन्ति।''[1]

न्यायकोशानुसारं विशेषनाम्नः नवीनपदार्थकल्पनाकारणेन दर्शनमेतद् वैशिेषिकमिति कथ्यते। यथा- **''शास्त्रार्थे वैशेषिकशब्दव्युत्पत्तिः विशेषं पदार्थभेदमधिकृत्य कृतो ग्रन्थः।''**[2]

ध्यातव्यमस्ति यत् वैशेषिकं न्यायदर्शनात् प्रचीनदर्शनं वर्तते। न्यायदर्शनेन प्रमेयप्रसङ्गान्तर्गते वैशेषिकाणां सप्तपदार्थाः समाहितास्सन्ति। अस्य दर्शनस्य विवरणं नैषधीयचरिते अन्येषु भिन्न-भिन्नप्रसङ्गेषु अवलोक्यते। यथा द्वाविंशतितमे सर्गे नलदमयन्त्ययोः सन्ध्यावर्णनप्रसङ्गे कविना प्रतिपादितं यत्र राजा नलः भैमीं प्रति कथयति यत् 'प्रिये! इदं तमसः विषये वैशेषिकाणां सिद्धान्तः मे अतीवरुचिकरः प्रतीयते, यतोहि वैशेषिका एव तमोनिरूपणे समर्था भवन्ति।

वैशेषिकदर्शनं खलु औलूकदर्शनमपि उच्यते यतोहि उलूकेन बिना तमसः समुचितनिरूपणं केन कर्तुं शक्यते।'[3]

प्रसङ्गस्यास्य विस्तरेण विवेचनेन द्वयोष्टीकाकारयोः उपर्युक्तमतं स्पष्टं भवति।

वैशेषिकदर्शनस्य गुणपदार्थविवरणस्य सङ्केतः श्रीहर्षेण नैषधीयचरितस्य एकविंशतितमे सर्गे नलदमयन्तीवार्तालापे नलमाध्यमेन भैम्याः सौन्दर्यवर्णनप्रसङ्गे कृतोऽस्ति। तद्यथा-

पीतो वर्णगुणः स चातिमधुरः कायेऽपि तेऽयं यथा
यं बिभ्रत्कनकं सुवर्णमिति कैरादृत्य नोत्कीर्त्यते।
का वर्णान्तरवर्णना धवलिमा राजैव रूपेषु य-
स्तद्योगादपि यावदेति रजतं दुर्वर्णतादुर्यशः।।[4]

अस्मिन् प्रसङ्गे कविः पीतवर्णं वैशेषिकानां सुवर्णपदार्थस्य अथवा द्रव्यस्य आश्रयः गुणो मन्यते। यथा हि मल्लिनाथनारायणयोः मतमत्र प्रस्तूयते-

प्रथमं जीवातुकारस्य मतं यथा- ''हे प्रिये! स प्रसिद्धः, अयम् एष पीतः गौरो नाम, वर्ण गुणः वर्णस्वरूपः, अतिमधुरः अतिरमणीयः, यथा येन हेतुना, यं पीतवर्णम्, बिभ्रत् धारयत्, कनकं हिरण्यम्, कैः जैः सुवर्णो शोभनः वर्णः यस्य तत् तादृशम्। इति एवंरूपेण आदृत्य आग्रहेणोल्लिख्य, न उत्कीर्त्यते? न उच्चैः प्रशस्यते। अपि तु सर्वैरेव उत्कीर्क्ष्यते इत्यर्थः। तथा तव भवत्याः, काये

1. तत्रैव, नैषधीयप्र.
2. न्या.को.
3. ध्वान्तस्य वामोरु! विचारणायां वैशेषिकं चारुमतं मतं मे। औलूक्यमाहुः खलु दर्शनं तत्क्षमं तमस्तत्त्वनिरुपणाय।।-नैषध. 22/35
4. नैषध. 21/151

शरीरे अपि, अस्ति इति शेषः। अत एव अतिमधुर इति मन्ये।''[1]

एवमेव नैषधीयप्रकाशेऽपि-''हे भैमी! वर्णेषु शुक्लादिरूपेषु मध्ये गुणो वैशेषिकादिभिर्गुणपदार्थत्वेन निर्दिष्टः पीतो हरिद्राभो वर्णः, स च एवातिमधुरो रमणीयतरः,

नतु वर्णान्तरं मधुरमित्यर्थः। यथा येन कारणेनायं पीतो वर्णस्तेऽपि काये देहे वर्तते अत्युत्तमया त्वयापि शरीरे धार्यते तस्मादयमत्युत्तम इत्यर्थः। निर्मलत्वादभ्यर्हितत्वाद्रूपविभागवेलायां वैशेषिकैः प्रथमोच्चारितत्वाच्च प्रधानभूत एव।''[2]

न्यायवैशेषिकसम्मतं सृष्टेः संगतिविवरणं नैषधीयचरिते तृतीयसर्गे दमयन्ती- हंसवार्तालापप्रसङ्गे प्राप्यते। तत्र श्रीहर्षः दूतहंसस्य दमयन्त्या सह वार्तालापानन्तरं ततः प्रस्थानावसरे हंसस्य माध्यमेन कथयति यत्-

अन्योन्यसंगमवशादधुना विभातां
तस्यापि तेऽपि मनसी विकसद्विलासे।
स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्त-
मादाविव द्व्यणुककृत्परमाणुयुग्मम्।।[3]

द्वयोष्टीकाकारयोरुपर्युक्तदार्शनिकविवरणमित्थमस्ति-

मल्लिनाथः- ''तत्परमाणुयुग्ममिवेत्युत्प्रेक्षा। तार्किकमते मनसोऽणुत्वादिति भावः। विभातां कार्यारम्भकपरमायुगलवदविश्लेषण विराजतामित्यर्थः।''[4]

नारायणः- ''किंभूतं परमाणुयुग्मम्? मनसिजस्य कामस्य तनुं शरीरं पुनः स्रष्टुं प्रवृत्तम्। अत एवादौ द्व्यणुकं करोतीति द्व्यणुककृत्। 'सक्रियाभ्यां द्वाभ्यां परमाणुभ्यामेकं द्व्यणुकमारभ्यते, एवं क्रमेण महत्कार्यमारभते' इति सिद्धान्तः। दग्धस्य कामस्य मनोजन्यत्वान्मनसिजत्वम्। ततश्च तदुत्पत्त्यर्थं मनोद्वयेन द्व्यकमारब्धव्यम्। तत्तु येन केनचिनमनोद्वयेन कर्तुं न शक्यते, एतादृशपरस्परानुरागस्य कुत्रचिदप्यभावात्। ततश्च युवयोरेव मनोद्वयेन कर्तुं शक्यते नान्येनेति भावः।''[5]

यद्यपि द्वयोष्टीकाकारयोः भावस्तु समान एव परं नैषधीयप्रकाशे सन्दर्भोऽयं स्पष्टतया व्याख्यायितः। अतएव पाठकानां कृते विशेषरुचिकरोऽयम्।

ईश्वरास्तित्वस्यापि प्रतिपादनं कृतमस्ति महाकविना। यतोहि न्यायदर्शनम् आगमप्रमाणेन ईश्वरसत्तायाः अस्तित्त्वं स्वीकरोति। न्यायशास्त्रानुसारम् ईश्वर अस्य जगतः निमित्तकारणम्, ज्ञानम्,

1. नैषध. 21/137, जीवातु
2. नैषध. 21/151, नैषधीयप्र.
3. नैषध. 3/125
4. तत्रैव, जीवातु
5. तत्रैव, नैषधीयप्र.

इच्छा, प्रयत्नमित्यादिगुणैः युक्त-नित्यमुक्त- सर्वज्ञ-जीवात्मनः अदृष्टानामुद्बोधनप्रदायकः सर्वशक्तियुक्तात्मा वर्तते तथा च अदृष्ट-जीवात्मनां कर्मफलयोर्मध्ये सम्बन्धं स्थापयति। उक्तं च यथा-

कार्याऽऽयोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः॥[1]

पाप-पुण्यमेव अदृष्टमुच्यते। उक्तदार्शनिकसिद्धान्तस्य चर्चा नैषधीयचरिते यथा-

करिष्येऽवश्यमित्युक्तिः करिष्यन्नपि दुष्यसि।
दृष्टादृष्टा हि नायत्ताः कार्यीया हेतवस्तव॥[2]

सन्दर्भोऽयम् इतोपि प्रामाणिको भवति यदा द्वयोष्टीकाकारयोः स्पष्टं मतं प्रकाश्यते। तत्र प्रथमम् आचार्यमल्लिनाथटीका-

''वृद्धाच्छः दृष्टादृष्टा लक्षितालक्षिताः, हेतव कारणानि, दण्डचीवरादयो दृष्टहेतवः, कालकर्मेश्वरेच्छादयोऽदृष्टा हेतवः इत्यर्थः। तव ते, आयत्ता अधीनाः न, किन्तु तत्तत्कार्योत्पादिका सामग्री कालवशाददृष्टवशाच्च स्वयमेव सम्पाद्यते, न तु त्वया सम्पादयितुं शक्या, तथा च करिष्येऽवश्यमित्युक्त्वा पापकार्येऽकृतोऽपि मनसि तच्चिन्तया मुखे तदुच्चादणेन च भवद्विधानां पातकं जातमिति भावः।''[3]

तथैव नारायणीटीकाऽपि-

''दृष्टादृष्टरूपा हेतवः, (तत्र) दृष्टसामग्री यथाकथंचिद्यद्यपि संपादयितुं शक्यते

तथाप्यदृष्टसामग्री त्वया शक्यते। तथा च नलेन यदि परमो धर्मः कृतः, तर्हि सा त्वया

पराभवितुमशक्यः। अथाऽधर्मः कृतः तर्ह्यधर्मवशादेव तादृशी दशा भविष्यति, त्वया किं क्रियत इत्युभयथापि दोषात्, 'ममैवं करिष्यते, कृतम्' इत्यादि वल्गना न कार्येति भावः।''[4]

अत्रापि नैषधीयप्रकाशटीका विषयमधिकतरं प्रकाशयति।

न्यायशास्त्रदृष्ट्या ईश्वरः अशरीरिभावात् सृष्टिकर्ता विद्यते। वैशेषिकदर्शने आचार्यप्रशस्तपादः तस्यानुयायिनश्च ईश्वरम् अशरीरिणमेव मन्यन्ते। तथ्यस्यास्य प्रकाशनं नैषधीयचरिते सप्तदशसर्गे कलिप्रतिनिधिना कामदेवस्य वर्णनप्रसङ्गे कृतम्। तत्र कलिप्रतिनिधिः वक्ति यत्- ''अयं कामदेव बुद्धस्य स्पर्धया लोकजिद्भावं धारणं करोतीति, तथा स एवं प्रतीयते यत् जगति अशरिण ईश्वरस्य

---

1. न्या.कुसुम. 5/1
2. नैषध. 17/147
3. नैषध.17/147, जीवातु
4. तत्रैव, नैषधीयप्र.

स्पर्धया अशरीरि भूत्वा स्वयं कर्ता भवति''।[1]

प्रसङ्गेऽस्मिन् उभयोष्टीकयोः उक्ततथ्यविषयकोल्लेखो यथा-

मल्लिनाथः- ''यस्य स्मरस्य, ईशतुलया इव ईश्वरसाम्यापेक्षया इवेत्यर्थः। देहदाहकारीश्वरस्पर्द्धयेवेति यावत्, शरीरं न भवतीति अशरीरि तस्य अशरीरिणः दग्धदेहत्वाद् अनङ्गस्य सतः, अत्र लोके, कर्तृत्वम् एकत्र-जेतृत्वम् अन्यत्र-स्रष्टुत्वम् उपादानादिगोचरापरोक्ष- ज्ञानादिमत्वादेवेश्वरस्य कर्तृत्वं शरीरमन्त्रमिति तार्किकाः।''[2]

नारायणः- ''ईश्वरो हि स्मरहरत्वात्स्मरस्य शत्रुः, तस्मात्तत्स्पर्धयेव तस्यारीरकर्तृत्वं स्वमविनयनेनाङ्गीकृतमित्यर्थः। यथा- अशरीरिण एवेश्वरस्य कर्तृत्वमिति न्यायविदः, तथा- अयमप्यनङ्ग एव सन् कार्यकारीत्यर्थः। जिनमहेशाभ्यां जितोऽपि लोकोजित्त्वेनाशरीरकर्तृत्वेन च यः पुनस्ताभ्यां समः।''[3]

निष्कर्षः- षडास्तिकदर्शनानि भारतीयचिन्तनधाराया आधारभूतानि सन्ति। जनमानसे एतेषां दर्शनानां प्रभावः स्पष्टं परिलक्ष्यते। अथ च विदुषां कवीनां तु कथैव का? नैषधीयचरितकारेण श्रीहर्षेण विविधवर्णनानां प्रसङ्गे न्यायवैशेषिकदर्शने विहितसिद्धान्तानां चर्चा स्पष्टतया विहिता। एतेषां व्याख्यानं कुर्वाणः प्रसिद्धटीकाकाराः मल्लिनाथनारायणादयः विविधसिद्धान्तानां व्याख्यानप्रसङ्गे तत्तद्दार्शनिकानां ग्रन्थेभ्य उद्धरणाण्यपि प्रदत्तवन्तः। अतएव एतेषां टीकाकाराणां दर्शनशास्त्रवैदुष्यमत्र स्पष्टं परिलक्ष्यते।

---

1. बिभर्ति लोकोजिद्भावं बुद्धस्य स्पर्धयेव यः। यस्येशतुलयेवात्र कर्तृत्वमशरीरिणः।।- नैषध.17/16
2. तत्रैव, जीवातु
3. तत्रैव, नैषधीयप्र.

ISSN - 0974-8946 शोधप्रभा
जनवरी-मार्च, 2019 वर्षः 44, प्रथमोऽङ्कः

ग्रहाणां रोगकारकतानिरूपणम्

डॉ.सुभाषचन्द्रमिश्रः*

ज्योतिषशास्त्रे शरीरस्य विचारः तनुभावतः भवति। प्रसङ्गेऽस्मिन् यदि लग्नम् लग्नेशः पापग्रहाणामन्तर्गतः स्यात्तदा सः जातकः रुग्णो भवति। ये ग्रहाः यस्मिन् भावे स्थिता भवन्ति तस्य प्रतिनिधित्वं च कुर्वन्ति। अतः अनेन लग्नस्थो ग्रहस्तनुभावसम्बन्धितधातूनां[1] प्रतिपादनं करिष्यति। यथा-लग्नस्थ ग्रह-धातूनां विवरणं अधोलिखितं वर्तते-

लग्नस्थग्रहाः	धातवः
सूर्यः	अस्थिः
चन्द्रः	रक्तः
भौमः	मांसः
बुधः	त्वक्
बृहस्पतिः	वसा
शुक्रः	वीर्यः
शनिः	स्नायुः

यदा बुधः लग्नेतरस्थाने पापग्रहयुक्तः दृष्टः वा स्यात्तदा त्वचा रोगोऽवश्यमेव जायते। परन्तु यदा स एव बुधः जन्मलग्ने चन्द्रलग्ने वा स्थितः स्यात्तथा च स एव बुधः पापग्रहान्तर्गतः स्यात्तदावश्यमेव शरीरे रोगोत्पन्नं करिष्यति। विशेषरूपेण यदि कोऽपि ग्रहः लग्ने स्थितः अथवा लग्नेशो भवेत् तदा स शरीरस्थिततत्त्वानाम् विशेषरूपेण नियामको भवतीति। यथा-भौमः मांसमज्जायाः कारकोऽस्ति, परन्तु यदा भौमः लग्नेशः व लग्ने स्थितः स्यात्तदा मांसस्य विशेषरूपेण प्रतिनिधित्वं करिष्यति। एवमेव शरीरे देवगुरुः उदरस्थानस्य मेदायाश्च प्रतिनिधित्वं करोति। अनेनैवप्रकारेण अन्ये ग्रहा अपि यदि लग्ने स्थितः लग्नेशः, बलहीनाः, पापग्रहान्तर्गताः वा स्युः तदा ते स्वकारकत्वानुसारेण

* सहायकाचार्यः (तदर्थः) रा.सं.सं. जयपुरपरिसरः, जयपुरम्।

1. जतकपरिजात 2/28, ज्योतिषशास्त्र में रोग विचार

रोगोत्पादका: भविष्यन्ति।

ग्रहाणाम् अङ्गानि रोगस्थानम्[1]–

ग्रहा:	अङ्गानि	रोगस्थानम्-
सूर्य:	चक्षु:	हृदस्थि:
चन्द्र:	मन:	फुस्फुस, संधिश्च
भौम:	मज्जा: (अस्थिसारतत्वम्)	मांस:
बुध:	वाक्शक्तिस्थानम्	त्वक्रोग:
बृहस्पति:	श्रवणशक्ति:	उदरान्त्रयकृतमेदश्च
शुक्र:	चक्षु:	मूत्र-वीर्यगुप्ताङ्गनि
शनि:	स्नायु:	तान्त्रिका-तन्त्रम्

लग्नेश: यदि नीचराशिगतस्थात्तदाऽपि रोगोत्पन्न: जायते। यत: लग्नाधिपति: व्यक्ते: सम्पूर्ण-शरीरस्य प्रतिनिधत्वं करोति। ग्रहा: नीचत्वम् दुर्बलताया: द्योतकोऽपि अस्ति। यदि सूर्यादिग्रहा: लग्नेशा: भूत्वा नीचस्था: स्युत्तदा विभिन्ना: रोगा: जायन्ते। यथा[2] सिंहलग्नस्य कुण्डल्यां यदि सूर्य: नीचस्थराशौ स्यात्तर्हि कर्णरोगेण जन: पीड़ितो भवति। कर्कलग्नस्य जन्माङ्गे यदि चन्द्रो नीचराशौ भवेत्तदा जलोदररोगो भवति। मेषलग्नस्य स्वामी भौमो यदा नीचराशिस्थ: स्यात्तर्हि हृदयरोग: फुस्फुसविकारश्च भवति। यदि वृश्चिकलग्नोत्पन्नजातक: स्यात् एवञ्च लग्नेश: नीचरतशिगत: स्यात्तदा नितम्बे उरूस्थाने च व्रणादिकं भवति।

यदि जातकस्य मिथुनलग्नं स्यात्तथा लग्नेशो नीचनराशिस्थ: भवेत्तदा जानुभ्यां पीडितो भवति। यदि कन्या लग्नोत्पन्न-जातकस्य लग्नेश: नीचराशिगत: स्यात्तदापूयरोगो जायते। धनुलग्ने लग्नेशो नीचराशिगत: स्यात्तदा मुखरोगो जायते। मीनलग्नं स्यात्तथा लग्नेश: नीचराशिगतस्तदा कर्णरोग: स्थूलपाद (फाइलेरिया) रोगश्च भवति। वृषलग्ने लग्नेशो नीचस्थो भवेत्तदा नेत्ररोगो जायते। कुम्भलग्ने लग्नेशो यदि नीचस्थो भवेत्तदा श्वासनलिका-दिविकार:-कण्ठरोगश्च भवतीति।

नीचस्थास्तंगत राशिस्थग्रहवशात् रोगोत्पत्ते: कारणम्

यदि कस्मादपि कारणवशात् जन्मकुण्डल्यां ग्रह: नीचराशिस्थ:, बलहीन: शत्रुराशिस्थ, अस्तंगत: स्यात्तथा स: ग्रह: शरीरस्थ यस्याङ्गस्य प्रतिनिधित्वं करोति, तस्याङ्गस्य सम्यक् पोषणं न

1. ज्योतिषशास्त्र में रोग विचार पृष्ठ-30 प्रो. शुकदेव चतुर्वेदी।
2. ज्योतिषशास्त्र में रोग विचार पृष्ठ 31, प्रो. शुकदेव चतुर्वेदी

भवति, परिणामतः तस्मिन्नङ्गे रोगोत्पत्तिर्जायते। प्रसङ्गेऽस्मिन् द्योलिखित-तालिकायां स्पष्टं भवति, यत् कस्य ग्रहस्य कस्मिन् स्थितौ कः रोगः भविष्यतीति। यथा- ग्रहः स्थितिः नीचस्थः, अस्तंगतः, शत्रुराशिस्थश्च तर्हि रोगाः-

सूर्यः	पित्तज्वरः, दाहः, नेत्रपीड़ा, हृददुर्बलता च
चन्द्रः	कफविचारः, उन्मादः, शीतज्यरः, जलोदरश्च
भौमः	अग्निदाहः, पित्तविकारः, गुप्तरोगः, शिरशूलश्च
बुधः	त्रिदोषविचारः, चर्मरोगः, कर्णरोगश्च
गुरुः	शोथः, नितम्ब-पादपीडा च
शुक्रः	नेत्र-मुख-मूत्र-वीर्यविकारः
शनिः	स्नायुपीडावायुविकारः

रोगभावे रोगकारकग्रहाः[1]

ज्योतिषशास्त्रे लग्नात् षष्ठस्थानं षष्ठाच्च षष्ठस्थानं रोगस्थानमित्युच्यते अतः अस्य भावेशोऽपि रोगप्रदो जायते। षष्ठस्थानस्य चन्द्रः, कफशीतज्वरः नेत्रविकारादिकं ददाति। परन्तु यदि षष्ठेशस्य अन्येन केनचित् भावेन सह परिवर्तनयोगः भवेत्तदा तत् सम्बन्धितरोगोत्पत्तिः भवति।

यथा - यदि षष्ठेन सह सम्बन्धकारकः चतुर्थेशो भवेत्तदा माता रूग्णा भवति। षष्ठेशस्य अष्टमेशेन व्यत्ययः स्यात्तर्हि नेत्रपीड़ा, गुप्तस्थाने रोगोत्पत्तिर्भवति। षष्ठाष्टमभावे स्थितः पष्ठेशः विभिन्नग्रहैः रोग संयुक्तो भूत्वा विभिन्नस्थानेषु व्रणदिरोगान् करोति। षष्ठाष्टमस्थाने स्थितः षष्ठेशः सूर्येण संयुक्तो यदि भवेत्तदा शिरसि व्रणः रोगो वा भवति। षष्ठेऽष्टमे वा स्थित षष्ठेशस्य योगो यदि विभिन्न ग्रहैः सह भवति तर्हि विभिन्नाः रोगाः भवन्ति यथा-

सूर्यः	शिरसि व्रण, रोगः
चन्द्रः	मुखविकारः

---

1. तेषामपि व्रणं वाच्यमादित्येन शिरो व्रणम्।
इन्दुना च मुखे कण्ठे भौमेन ज्ञेन नामिषु ।।
गुरूणा नासिकायां च भृगुणा नयने व्रणः।
राशिना राहुणा कुक्षौ केतुना च तथा १ वेत् ।
लग्नाधिपा कुजे क्षेत्रे बुधक्षेत्रेऽपि वास्थिते।
यत्र-कुत्र स्थितो ज्ञेन विक्षितो मुखरूक्प्रदः ।। बृहत्पाराशरहोराशास्त्रम् ।। 1,2,3,4,5,6

भौमः	कष्ठरोगः
बुधः	नाभिप्रदेशे रोगः व्रणश्च
गुरुः	नासिकायाः रोगः व्रणश्च
शुक्रः	चक्षुरोगः व्रणश्च
शनिः	पादपीडा व्रणरोगश्च

अष्टमेशस्य व्ययेशस्य च रोककारकता[1]

आचार्यैः अष्टमं द्वादशस्थानञ्च रोगकारकं मन्यते। अतः अष्टमेशः व्ययेशश्चापि रोगकारकौ। यदि क्रूरग्रह, बलयुक्तो भुत्वा षष्ठेशः अष्टमेशः वा भवेत्तथा यस्मिन् भावे स्थितः स्यात्तर्हि दृष्टियुतिवशात् भाव-सम्बन्धितांगे रोगमुत्पादयति। यद्यष्टमेशव्ययेशयोः सम्बन्धः अन्यभावैः सह न स्यात्तर्हि रोगस्य सम्भावना न्यूना भवति, यतो हि सम्बन्धमात्रात् रोगस्य संभावना भवति यथा लघुपराशर्या वर्णनं मिलति सूर्यः चन्द्रः वा यदि अष्टमेशो भवेत्तदा अशुभं न करोति परन्तु शुभमपि न भवतीति। यदि त्रिकोणेशो व्ययेशो यदि स्यात्तदा शुभफलकारको भवति।

षष्ठभावस्थाः ग्रहाः - षष्ठभावस्थ ग्रहोऽपि रोगोत्पन्नकारको भवति। अत्र स्थितग्रहो यस्य भावस्य भावेशः, यस्य राशेः राशीशः कारको वा स्यात्, तथा च सः राशिः कालपुरुषस्य यस्याङ्गस्य प्रतिनिधित्वं करोति तस्मिन्नङ्गे रोगोत्पत्तिर्जायते। यस्य भावस्य भावेशस्त्रिकस्थभवेत्तदा स तस्य भावस्य शुभतां नष्टं करोति। यथा- यदि पञ्चमेशः गुरु सूर्येण सह षष्ठे स्थितः स्यात्तदा तस्य जातकस्य स्त्रियाः गर्भस्रावोऽथवा मृतसंततिर्भवति। अतोऽस्य तात्पर्योऽस्ति 'पुत्रकारकः ग्रहः यदा षष्ठभावस्थः षष्ठेशेन युतो वा स्यात् तदा गर्भस्थ शिशोपरि दुष्प्रभावो जायते' इति। यतोहि त्रिकस्थानेषु कस्यापि भावस्य शुभफलं नष्टं भवतीति।

पापग्रहाणां प्रभाव[2] :- यदि ग्रहः कूरग्रहैः सह कूरग्रहैः दृष्टश्च स्यात्तर्हि पापप्रभावेन ग्रस्तो भवति। यस्य भावस्य भावेशः कूरग्रहैः संयुक्तो वा स्यात् तदा तत्सम्बन्धिताङ्गेषु रोगोत्पतिर्भवति। यद् ग्रहोच्चस्थानात् नीचस्थानं प्रति आगच्छति तदा सः ग्रहः अवरोही संज्ञको भवति अवरोही संज्ञकग्रहदशायां तत्सम्बन्धितरोगोत्पत्तिर्भवितुं शक्यते।

छिन्द्रग्रहस्तथा तेषाम् दशायाम् मृत्युयोगः[3]

रन्ध्रेशः-रन्ध्रस्थगृहः-मृत्युस्थानं पश्यन् ग्रहः अष्टमेशयुक्तग्रहः चतुष्टयांशेशः रन्ध्रेश्वरस्थाधिपः ग्रहः खरेश्वरः, एते सप्तछिद्र-ग्रहाः सन्ति। एतेषु यः बलयुक्तो भवेत् तस्य महादशायां जातकस्य

1. लघुपाराशरी 2/11 एवञ्च ज्योतिषशास्त्र में रोगविचार पृष्ठ 282.
2. ज्योतिषशास्त्र में रोगविचार।
3. जातक पारिजात 5/52, 54

मृत्युर्भवति। तस्य भावस्य व्ययेशो व्यभावस्थग्रहयोः महादशान्तर्दशामवश्यं मृत्युर्भवतीति।

सूर्यादिरोकारकग्रहाणां रोगाः- सूर्यस्य रोगकारकस्थितौ पित्तविकारः, ज्वरः, तपनं, विकृतमूर्च्छा (मिर्गी) हृदपीडा, नेत्ररोगः, नाभिस्तले रोगः, चर्मरोगः, अस्थिरोगः, शत्रुभयम्, कुष्ठरोगः, अग्निभयन, अस्त्रभयम्, विषपीडा, वियोगः, चौरः, चतुष्पादभयम्, सर्पभयम्, यमभयञ्च जायते।[1]

चन्द्रकृतरोगः - चन्द्राद् अनिद्रा, आलस्यः, कफः, अतिसारः, शीतज्वरः श्रृंगी पशुभयम्, जलचरभयम्, मन्दाग्निः, अरुचिः, स्त्रीपीडा, पीतज्वरः, अम्बुभयम् मानसिकासंतुलनम्, सर्पभयम, यक्षणीभयं भवतिः[2]

भौमकृतरोगाः- तृष्णाः, पित्तप्रकोपः, पित्तज्वरः, पाण्डुरोगः, अग्निभयम्, विषभयम्, सर्पभयम्, कुष्ठरोगः, नेत्रपीडा, गुल्मरोगः, अपस्मारः, मज्जारोगः, देहभग्नः, नृपभयम, चौरभयम्, भातृभयम्, मित्रभयम्, पुत्राद् भयम्, शत्रुयुद्धभितिः।[3]

बुधकृतरोगाः - बुधग्रहात् भ्रान्तिः, दुर्वचनम्, कण्ठरोगः, नासिकारोगः, त्रिदोषः, (वात-पित्तकफात्मकरोगाः), चर्मरोगः पाण्डुरोगः, दुस्वप्नः, विचर्चिका, अग्निभयम् गन्ध-र्वादिभिरुत्पन्नभयश्चेति।

बृहस्पतिकृतरोगाः[4] - यदि गुरुरोगकारकः स्यात् तर्हि गुल्मः आंत्रज्वर, मूर्छा कफविकारः, कर्णरोगाश्च भवन्ति। दैवस्थानसम्बन्धकष्टमपि भवति। यदा-कदा धनविवादेन मनसि कष्टाधिक्यं विद्याधर-किन्नर- देवतासर्पादिभिः कष्टं भवति, पूर्वजन्मनि कृतपापस्य फलमपि अत्रैव बृहस्पतिदशायां बृहस्पतेः रोगकारकतायां मिलति।

शुक्रकृतरोगाः[5] - रक्ताल्पता कफवायुविकारः, नेत्ररोः मूत्ररोगः, प्रमेहः जननेन्द्रियसम्बन्धः रोगः, उपदंशः, वीर्याल्पता, क्लीबता च भवति।

शनिकृतरोगाः[6] - वातकफविकारः पादविकारः, अपङ्गता भ्रान्ति, कुक्षिरोगः शारीरिकोष्णता, मानसिककष्टम्, भार्यापुत्राभ्यां मानसिककष्टम्, उच्चस्थानात् पतनम् हृदि ज्वलनं मानसिकचिंता च भवति।

---

1 फलदीपिका 14/1
2 तत्रैव 14/2
3 तत्रैव 14/3
4 तत्रैव 14/7
5 फलदीपिका 14/8
6 फलदीपिका 14/9

राहुकृतरोगाः[1] - कलहः, मानसिककष्टं क्लेशः, शत्रुभयञ्च भवति।

शुभपापग्रहाणाञ्च स्थितिः -

पराशरसिद्धान्तानुसारेण त्रिषडायाधीशाः पापग्रहाः भवन्ति, तथा च अष्टमेशः परमपापी भवति। कस्मिन् लग्ने कः ग्रहपापी कश्च ग्रहः परमपापी भवति। एतस्मिन् विषये निम्नतालिका माध्यमेन् ज्ञायते। यथा[2]-

लग्नम्	**परमपापीग्रहः**	**पापीग्रहः**
मेषः	बुधः	शनिः
वृषः	चन्द्रः, गुरुः	शुक्रः
मिथुनः	सूर्यः, भौमः	शनिः
कर्कः	बुधः	गुरुः, शनिः
सिंहः	बुधः	गुरुः, शुक्र
कन्या	भौमः	चन्द्रः शनिः
तुलाः	गुरुः	सूर्यः
वृश्चिकः	बुधः	भौमः, शनिः
धनुः	शुक्रः	चन्द्रः, शनिः
मकरः	गुरुः	सूर्यः, भौमः
कुम्भः	चन्द्रः	भौमः, शुक्रः
मीनः	शुक्रः, शनिः	सूर्यः

पापग्रहाः -

जातकशास्त्रानुसारं सूर्यः, क्षीणचन्द्रः, भौमः, शनैश्चरः, राहु-केतुश्च पापग्रहाः। शुभग्रहाः, बुधः, गुरुः, शुक्रश्च शुभग्रहाः भवन्ति। पापग्रहेण युतो बुधोपि पापी भवति।

यथोक्त वराहेण - क्षीणेन्द्रर्कमहीसुतार्कतनयाः पापी बुधस्तैर्युतः।

1. फलदीपिका 14/8
2. लघुपाराशरी हिन्दी व्याव्या पृष्ठ 98

ISSN - 0974-8946
जनवरी-मार्च, 2019

शोधप्रभा
वर्षः 44, प्रथमोऽङ्कः

यमसंज्ञकायोगवाहस्य शास्त्रीयविमर्शः

श्रीसूर्यमणिभण्डारी*

अस्माकं संस्कृतसाहित्यस्य वर्णस्वरूपविज्ञानप्रबोधनविधौ देवनागर्यादिलिपिषु च अयोगवाहस्य वैशिष्ट्यमतिशयेन वर्तते । तत्र ह्येतेऽयोगवाहाश्चिह्नविशेषैरुच्चारणविधिवैशिष्ट्येन च सर्वत्र मन्त्रादिषु प्रतिभासमाना भवन्ति । एतेषां प्रयोगवशादेवास्माकं संस्कृतभाषोच्चारणदृष्ट्या लेखनदृष्ट्या चान्यतमा प्रतीयते। वस्तुतोऽयोगवाहानां स्वातन्त्रेण मौलिकन्नास्त्यस्तित्त्वं, यतो हीमेऽयोगवाहा अकारादिवर्णाश्रिताः सन्त एव स्वात्मबोधं कारयन्ति । तेन शिक्षादिग्रन्थेष्वयोगवाहा व्यङ्ग्त्वेन पराश्रितत्वेन व्यवह्रियन्ते। उक्तं हि **अयोगवाहा विज्ञेया आश्रयस्थानभागिनः**[1]। भाष्यकारस्योव्वटस्य मतेऽयोगवाहस्य लक्षणं वर्तते यत् - अकारादिना वर्णसमाम्नायेन सहिताः सन्त एते वहन्त्यात्मलाभं प्राप्नुवन्त्ययोगवाहाः[2]। महाभाष्यकारो भगवान् पतञ्जलिरप्याचष्टे यदिमे अयोगवाहा न क्वचिदुपदिश्यन्ते श्रूयन्ते च । अर्थात् - एतेषां कुत्राप्युपदेशो न क्रियते तथापि श्रुतावागच्छन्ति। अग्रे व्याख्यायाञ्च - यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्त इति वचनम्[3]। शब्दकौस्तुभकारमते अयोगवाहस्य व्युत्पत्तिलभ्यार्थो भवति- अविद्यमानो योगः प्रत्याहारेषु सम्बन्धो ते अयोगाः, वाहयन्ति निर्वाहयन्ति प्रयोगमिति वाहाः। अयोगाश्च ते वाहाश्चेत्ययोगवाहाः[4]। वस्तुतोऽध्ययनेनोपर्य्युक्तमुव्वटमतमेव प्राशस्त्यमित्यवधर्तु शक्यते। अयोगवाहानां प्रत्याहारसूत्रेषु पाठाभावेऽपि शिक्षाप्रातिशाख्यादिग्रन्थानां वर्णसमाम्नाये विशेषोल्लेखः क्रियते।[5] यथा- वाजसनेयिप्रातिशाख्ये प्रतिपादिते पञ्चषष्टिसंख्यके वर्णसमाम्नाये अयोगवाहानां चर्चाविशेषो वरीवर्ति । तद्यथा- **ᳵ क इति जिह्वामूलीयः। ᳵ प इत्युपध्मानीयः। अं इत्यनुस्वारः। अः इति विसर्जनीयः। हुँ इति नासिक्यः। कुँ खुँ गुँ घुँ इति यमाः**[6]। अयोगवाहानां संख्या (1)

---

* अतिथिव्याख्याता, व्याकरणविभागे, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

1. पणिनीयशिक्षा, श्लो 22
2. शुक्लयजुर्वेदप्रातिशाख्यम् (उ. भा.) 8/18
3. व्याकरणमहाभाष्यम् (प्रत्याहाराह्निकम्) हयवरट् सूत्रम्
4. व्याकरणमहाभाष्यम् (प्रत्याहाराह्निकम्) हयवरट् सूत्रम्
5. स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
   यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ।।
   अनुस्वारो विसर्गश्च ᳵ क ᳵ पौ चापि पराश्रितौ । पा. शि. श्लो- 4-5
6. शुक्लयजुर्वेदप्रातिशाख्यम् 8/19-24

जिह्वामूलीयः, (2) उपध्मानीयः , (3) अनुस्वारः, (4) विसर्गः, (5) नासिक्यः, (6) यमः, इत्यनेन षड् वर्तते ।

महाभाष्यकारः पतञ्जलिरप्ययोगवाहानामनेन रूपेणोल्लेखं करोति । **के पुनः अयोगवाहाः? विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वारनासिक्ययमाः**[1]। उदाहरणदृष्ट्या–

1. जिह्वामूलीयः– **विष्णो ॅ क्रमोऽसि। तत ॅ खनेम।**[2]
2. उपध्मानीयः– **वसो ॅ पवित्रम्। या ॅ फलिनीर्या।**[3]
3. अनुस्वारः– **अपाꣳ रसेन। त्वाꣳशश्वन्तः। तपूꣳषि।**[4]
4. विसर्गः– **देवः सविता। सा विश्वायुः।**[5]
5. नासिक्यः– **गवयाँस्त्वष्ट्रे। अन्याँस्ते।**[6]
6. यमः– **रुक्क्मः। यज्ञ्ञः।**[7]

अयोगवाहेषु यमसंज्ञकायोगवाहस्य विशेषप्रयोगो वेदेष्वेव दरीदृश्यते । वाजसनेयिप्रातिशाख्यानुसारं यमविधायकं सूत्रं वर्तते – **अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदम् ।**[8] अर्थात्– पदमध्ये पञ्चमे स्पर्शवर्णे परे सति पञ्चमस्पर्शभिन्नाः प्रथमद्वितीयतृतीयचतुर्थवर्णा विच्छेदं प्राप्नुवन्ति । अत्र यमस्य कृते विच्छेदपदप्रयोगः क्रियते । उक्तं हि भाष्ये – **विच्छेदो यम इति पर्यायः**[9]। प्रथमस्पर्शे यथा – रुक्क्मः । अत्र '**स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र**'[10] इत्यनेन सूत्रेण स्वरात् परवर्तिनः संयोगादिस्पर्शवर्णस्य ककारस्य द्वित्वे कृते सति पदमध्ये विद्यमानोऽपरः स्पर्शवर्णः ककारः पञ्चमे स्पर्शवर्णमकारे परे विच्छेदं (यमं) प्राप्नोति।

ऋक्प्रातिशाख्यमतेऽपि तद्वदेव विधानं भवति । तत्र ह्याचार्यशौनकः– **स्पर्शा यमाननुनासिकाः स्वान्परेषु स्पर्शेष्वनुनासिकेषु**[11] –अर्थात् – अननुनासिकस्पर्शवर्णा यममाप्नुवन्ति , अनुनासिकस्पर्शवर्णपरे।

---

1. व्याकरणमहाभाष्यम्(प्रत्याहाराह्निकम्)
2. शुक्लयजुर्वेदः मा.सं. 12/5, 11/22
3. शुक्लयजुर्वेदः 1/2, 12/89
4. शुक्लयजुर्वेदः 19/14 , 17/76, 13/10
5. शुक्लयजुर्वेदः 1/1 ,4
6. शुक्लयजुर्वेदः मा. सं. 24/28, 17/11
7. शुक्लयजुर्वेदः मा. सं. 12/ 1, 8/ 4
8. यजुर्वेदप्रातिशाख्यम् 4/163
9. यजुर्वेदप्रातिशाख्यम् उ.भा.4/163
10. यजुर्वेदप्रातिशाख्यम् 4/101
11. ऋक्प्रातिशाख्यम् 6/29

यथा-

कवर्गीययमसंज्ञकस्पर्शो यथा- **पलिक्क्ँनीरित्**[1] । **चख्ख्ँनथुः** । **परिग्ग्ँमन्वृत्रघ्घ्ँने**।[2]

चवर्गीययमो यथा- **निदो यत्र मुमुच्च्ँमहे**[3]। **परिज्ज्ँमानमिव**[4]।

तवर्गीययमो यथा- **आत्त्ँमा ते वातः**[5]। **अमथ्थ्ँनादन्यम्**[6]।

वद्द्ँमा सूनो[7]। **आ ते दारुणि दध्ध्ँमसि**[8]।

पवर्गीयो यमः - **आप्प्ँनानं तीर्थम्**[9]। **गृभ्भ्ँणामि ते**[10]।

शौनकाचार्यमते यमसंज्ञको नास्त्यतिरिक्तो वर्णागमः , किञ्च पञ्चमस्पर्शपरे पूर्वे विद्यमानो यत् पञ्चमस्पर्शवर्णादतिरिक्तो यो वर्णविशेषः स एव यमत्वं लभते । तैत्तिरीयप्रातिशाख्यमतानुसारम् , अथर्वप्रातिशाख्यानुसारं च अपञ्चमस्पर्शात् पञ्चमस्पर्शपरे सति मध्ये यो नासिक्यवर्णागमः स एव यम इति संज्ञया व्यवह्रियते । उक्तं च - **स्पर्शादनुत्तमादुत्तमपरादानुपूर्व्यान्नासिक्याः**''[11] - अर्थात् - उत्तमव्यतिरिक्तेभ्यः प्रथमादिवर्णेभ्य उत्तमवर्णपरेषु मध्ये यथाक्रमं प्रथमादिवर्णसदृशस्य नसिक्यवर्णस्यागमो भवति। यथा- प्रथमस्पर्शात् प्रथमनासिक्यः, द्वितीयस्पर्शात् द्वितीयनासिक्यः, तृतीयस्पर्शात् तृतीयनासिक्यः एवं चतुर्थस्पर्शात् चतुर्थनासिक्यः । तस्यैव यमसंज्ञा भवति- **तान्यमानेके**।[12] उदाहरणदृष्ट्या यथा-

प्रथमनासिक्यः- **भवं यक्क्ँना**[13]। **सोमेन त्वाऽऽतनच्च्ँम्**[14]। **तं प्रत्त्ँनथा**[15]।

द्वितीयनासिक्यः- **विमथ्थ्ँनानाः**[16]।

---

1. ऋग्वेदः 5/2/4
2. ऋग्वेदः 9/98/10
3. ऋग्वेदः 9/29/5
4. ऋग्वेदः 1/127/2
5. ऋग्वेदः 7/87/2
6. ऋग्वेदः 1/93/6
7. ऋग्वेदः 6/93/6
8. ऋग्वेद- 8/102/20
9. ऋग्वेदः 10/114/7
10. ऋग्वेदः 10/85/36
11. तैत्तिरीय-प्रातिशाख्यम् -21/12
12. ,,, ,, ,, 21 /13
13. तैत्तिरीयसंहिता 21/13
14. तैत्तिरीयसंहिता 1/4/36
15. तैत्तिरीयसंहिता 1/1/3
16. तैत्तिरीयसंहिता 1/4/9

तृतीयनासिक्यः – **अग्गँने महान्**[1]। **ईयः परिज्जँमा**[2]। **विद्दँमाते**[3] । चतुर्थनासिक्यः – **दारुणि दध्धँमसि**[4]। इत्यादि। वस्तुतस्त्रिभाष्यरत्ने एवं वैदिकाभरणभाष्ये स्पष्टरूपेणापरस्य नासिक्यस्पर्शवर्णस्योल्लेखो न क्रियते । किञ्चोल्लेखितव्यं सूत्रभावार्थबोधाय । नारदीयशिक्षायामप्यनन्तस्य गकारादेरन्त्येन ङकारादिना संयोगो यदा भवति तदा मध्ये यमसंज्ञकः पूर्वसदृशो वर्णो निष्पद्यते । ऋक्तन्त्रानुसारमप्येषैव व्यवस्था वर्तते – **''अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः''**[5]

अनन्त्यश्च भवेत् पूर्वोऽन्त्यश्च परतो यदि ।

तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः ।[6]

यथा – **अग्नऽ आयाहि** [7]।

अथर्वप्रातिशाख्येऽप्येकस्मिन् पदेऽनुत्तमस्पर्शादुत्तमस्पर्शे परे सति यथासंख्यं यमस्य विधानं भवति । **''समानपदेऽनुत्तमात्स्पर्शादुत्तमे यमैर्यथासंख्यम्''**[8] यथा-

तक्मन् =तक्कँमन्[9]। **यज्ञः=यज्जँञः**[10]। **सपत्नम् = सपत्तँनम्**[11]। **स्रथ्नानः= स्रथ्थँनानः**[12]। **गृभ्णामि=गृभ्भँणामि**[13]। यमस्य विधानं तु स्पर्शवर्णसंनिधान एव न तूष्मान्तस्थवर्णसंयुक्ते। अस्मिन् विषये रोचक एकः श्लोकः पठ्यते यत्-

पञ्चमाः शषसैर्युक्ता अन्तस्थैर्वापि संयुताः।
यमास्तत्र निवर्तन्ते श्मशानादिव बान्धवाः।।[14] तद्यथा-

ऊष्मवर्णसंयुक्ताः पञ्चमस्पर्शाः –**अश्म्मा। पृश्न्निः। पाष्ण्ण्यां। राष्ट्ट्रम्। हस्त्ते।** अन्तस्थवर्णसंयुक्ताः पञ्चमस्पर्शाः- **शल्म्मलिः। उल्ब्बम्। दधिक्क्राव्ण्णः।**

---

1. तत्रैव 2/5/9
2. ,,,,, ,, 7/1/20
3. तैत्तिरीयसंहिता ,, 4/2/2
4. ,, ,, ,, 4/1/10
5. ऋक्तन्त्रम्- 1/2
6. नारदीयशिक्षा- 2/2/8
7. सामवेदसंहिता 1/1/1
8. अथर्वप्रातिशाख्यम्- 1/4/8
9. अथर्ववेदः- 5/22/2
10. अथर्ववेदः 4/11/4
11. अथर्ववेदः- 7/109/3
12. अथर्ववेदः- 14/1/57
13. अथर्ववेदः- 3/8/6
14. याज्ञवल्क्यशिक्षा उ.श्लो. 95

अत्रोभयस्थले ऊष्मवर्णेभ्योऽन्तस्थवर्णेभ्यश्च परः पञ्चमः स्पर्शो द्विरुच्यते, तत्र प्रथमस्पर्शः क्रमजो भवति। किञ्चास्मिन् विषये यमस्य निवृत्तिस्तद्वद् भवति यथा श्मशानात् (शवदाहानन्तरं) बान्धवानां निवृत्तिर्भवति। अर्थान्मकारादीनां पञ्चमस्पर्शवर्णानां यमसंज्ञा न भवतीति। वाजसनेयिप्रातिशाख्यमतेऽपि ऊष्मसंज्ञकवर्णेभ्यः पञ्चमस्पर्शे परे मध्ये द्वित्वेन संप्राप्तस्य प्रथमपञ्चमस्पर्शस्य यमकरण आपत्तिर्भवति, (दोषो भवतीत्यर्थः)[1]। तत्रोच्चारणदृष्ट्या सान्तस्थस्पर्शवर्णसंयोगस्थले दारुपिण्डो भवति। सोष्मस्पर्शवर्णानां संयोगस्थले च ऊर्णापिण्डो भवतीति तयोर्विशेषः।

निष्कर्षः- कृत्स्नाध्ययनेनेदं सुपष्टं भवति यत् समानपदेऽपञ्चमपर्शात् पञ्चमस्पर्शपरे सति मध्ये पूर्ववर्णसदृशो नासिक्यवर्णो निष्पद्यते । तस्यैव शास्त्रेषु यमसंज्ञया व्यवहारो भवति। **स्वरात् संयोगादिर्द्विरुच्यते सर्वत्र'** इत्यनेन सूत्रेण स्वरादुत्तरस्य संयोगादिवर्णस्य द्वित्वं भवति। तेन रुक्क्मादिशब्दा उत्पद्यन्ते। केवलं पञ्चमापञ्चमयोः स्पर्शवर्णयोर्यत्र संयोगस्तत्र द्वित्त्वेन प्राप्तो मध्यस्थः पूर्वसदृशो वर्णो नासिक्यमाप्नोति। यथा- **रुक्कँ्मः। चख्खँ्थुः। अग्गँ्नः। वृत्रघ्घँ्नः**। केचन प्रातिशाख्यकारा यमस्य विधाने समानपदस्याथवा पदमध्यस्य चर्चा न कुर्वन्ति। किञ्च वाजसनेयिप्रातिशाख्यकार आचार्यः कात्यायनः स्पष्टरूपेण **'अन्तः पदे'** इत्युल्लिखन् पदमध्ये यमं विदधाति। अत एव **'त्मन्या'**[2] इत्यत्र तकारो यमं न प्राप्नोति स्वरात् परवर्त्यभावात् तकारस्य द्वित्त्वं न भवत्यतः पदमध्यस्थाभावात् तस्य यमसंज्ञा न क्रियते। यमस्य विषये सर्वोत्तमविचारः शुक्लयजुर्वेदीयप्रातिशाख्यस्यैव वरीवर्त्ति।

यमसंख्यानिर्धारणम् - यमस्य संख्यानिर्धारणेऽनेका विप्रतिपत्तयो वर्तन्ते यत् चत्त्वारो यमा वा विशतिर्यमाः। सूत्रमाध्यमेन तु विंशतिर्ज्ञायन्ते। यतोहि पञ्चवर्गाणां पञ्चमातिरिक्ता ये स्पर्शाः प्रथमो द्वितीयस्तृतीयश्चतुर्थश्च ते यमसंज्ञका भवन्तीति सूत्रकाराणां मतम्। किञ्च केचन विद्वांसः **'कुँ खुँ गुँ घुँ इति यमाः'**[3] इति सूत्रनिर्देशाच्चत्वार एव यमा इति मन्यन्ते। अस्य दर्शनं विशेषेण वाजसनेयसंहितायां भवति। तत्र हि - **तं पत्नी** इति मन्त्रे **तं पत्त्नी** इत्यनेन रूपेण यमनिर्देशकरणे

तं पत्क्नी[4]। इति कवर्गीयप्रथमस्पर्शस्य कँ् इत्यस्य निर्देशो भवति। तथा **तम्प्रत्नथा** इति मन्त्रे **तं प्रत्क्नथा**[5]। इत्यनेन रूपेण कवर्गीययमनिर्देशः। किञ्च गुरुपरम्परायां संहितापाठेऽस्य कवर्गीययमस्योच्चारणं न दृश्यते। वस्तुतः भाष्यकार उव्वटानुसारेण यमस्य संख्या विंशतिर्भवति। चत्वारः सन्तोऽपि यमा वर्गभेदेन विंशतिस्थानिनः स्वरूपं प्राप्नुवन्ति। ऋक्वेदिनां कृते विशतिर्यमा उक्तास्तथापि स्वरूपैश्चत्वार एव। उक्तं चोव्वटेन- **यस्माद्यथा नासिकास्थानश्चत्वारः सन्तो**

---

1. ऊष्मभ्यः पञ्चमेषु यमापत्तिर्दोषः। वा.प्रा. 4/164
2. शुक्लयजुर्वेदः मा. सं.20/45
3. यजुर्वेदप्रातिशाख्यम् 8/24
4. शुक्लयजुर्वेदः मा.सं. 15/50
5. शुक्लयजुर्वेदः मा.सं. 7/12

विंशतिस्थानिनां स्वरूपा लक्ष्यन्ते।[1] पाणिनीयशिक्षायां चतुःषष्टिवर्णानां गणनाक्रमे यदुक्तं – **'चत्वारश्च यमाः स्मृताः'**[2] अस्य तात्पर्य वर्गाणां प्राथम्यादिधर्मेणैव। तत्र हि वर्गाणां प्रथमद्वितीयतृतीयचतुर्थवर्णाणा-माधारीकृत्य चत्वारो यमा इत्युक्तम्। याज्ञवल्क्यशिक्षायां चानेन रूपेण चतुर्णा यमानां गणना क्रियते –

रुक्मेति प्रथमो ज्ञेयः सक्थ्ना इत्यपरो भवेत्।
विद्घ्नाते तु तृतीयश्च जम्भे दद्ध्मश्चतुर्थकः।।[3]

केषाञ्चित् मते चत्वारो यमा अनेन प्रकारेण भवति। यथा–

(1) अघोषोऽल्पप्राणो यमः – कँ, चँ, टँ, तँ, पँ।

(2) अघोषमहाप्राणो यमः – खँ, छँ, ठँ, थँ, फँ।

(3) सघोषऽल्पप्राणो यमः – गँ, जँ, डँ, दँ, बँ।

(4) सघोषमहाप्राणो यमः – घँ, झँ, ढँ धँ भँ।

उच्चारणनियमः –

यमस्योच्चारणविषयस्य यद्यन्वीक्षणं क्रियते चेद्यम इति विशेषसंज्ञाकरणेन अन्वर्थसंज्ञाबलादेव सुस्पष्टो भवति। तत्र हि यमस्य व्युत्पत्तिलभ्यार्थो भवति युगलमिति। यतोहि यमस्य प्रादुर्भावः पूर्ववर्तिनोऽननुनासिकस्पर्शवर्णस्य परवर्तिनोऽनुनासिकस्पर्शवर्णस्य च संमिश्रणेन भवति। अतो यमसंज्ञकवर्णे उभयगुणो भासते। अर्थात् – यमा अननुनासिकेन (कण्ठादिना) अनुनासिकेन (नासिक्यवर्णेन) युक्ता भवन्ति। यथा पञ्चमेषु **ञ म ङ ण न** इति वर्णेषु उभयगुणो (कण्ठादिनासिक्यः) भासते , तद्वदेवात्रापि। ऋक्प्रातिशाख्यानुसारं यमः स्वीयप्रकृतिसदृग्भवति। उक्तं हि – **''यमः प्रकृत्यैव सदृक्''**[4]**।** अथवादौ यमोच्चारणकाल एव प्रथमध्वनिर्यो निष्पद्यते स स्वाश्रयभूतः स्पर्शवर्णात्मको भवतीति।[5] वाजसनेयिप्रातिशाख्ये च यथा संयोगादिभूतो वर्णः पूर्वस्य स्वरस्याङ्गं भवति, तद्वदेव यमोऽपि पूर्ववर्णसहितः पूर्वस्वरस्यङ्गं भवतीति[6] वचनम्। **अनन्यस्तु प्रकृतेः प्रत्ययार्थे**,[7] इति वचनात् यमः प्रकृत्याश्रयाणि कार्याणि लभते। विशेषतः यमस्योच्चारणस्थानम्

1. ऋक्प्रातिशाख्यम् उ.भा. 6/33
2. पाणिनीय-शिक्षा श्लो 4
3. याज्ञवल्क्यशिक्षा (संपादकः- रमेश झा) श्लो 93 उत्तरार्धस्य
4. ऋक्प्रातिशाख्यम् 6/32
5. श्रुतिर्वा यमेन मुख्यास्ति समानकला । ऋ.प्रा. 6/33
6. यजुर्वेदप्रातिशाख्यम् 1/103
7. ऋक्प्रातिशाख्यम् 6/34

अनुस्वारनासिक्यवर्णसदृशं नासिकास्थानं वर्तते। अत्र शुक्लयजुर्वेदीयप्रातिशाख्यस्य वचनं वर्तते - **यमानुस्वारनासिक्यानां नासिके**[1]। यमस्योच्चारणं नासिकाया मूलभागेन भवति। तद्वदेव पाणिनीयशीक्षायामप्युल्लेखः क्रियते **अनुस्वारयमानां च नासिका स्थानमुच्यते**[2]। यमस्योच्चारणस्थानं नासिका तु भवत्येव किञ्च द्वितीयं प्रकृत्याश्रयं यत् कण्ठताल्वादिस्थानं तदपि भवत्यतो यम उभयगुणात्मको भवतीति शास्त्रमन्तव्यम्। परस्परसंश्लिष्टावयवा एकत्वेन यमेषु भासन्ते तेनैषा**मयःपिण्ड** इति संज्ञा क्रियते शिक्षाकारैः[3]। केचन सुधियः **अशरीरं यमं विद्यात्**,[4] इत्यादिवचनप्रामाण्येन यममुच्चारणविषयं न मन्वतेऽतः परम् आम्नायपाठमर्मज्ञाः सम्प्रदायविद एतत्स्वरूपं विभावयन्त्विति[5]।

---

1. वजसनेयिप्रातिशाख्यम्- 1/74
2. पा.शि. श्लो. 22
3. यमान् विद्यादयः पिण्डान् सान्तस्थान् दारुपिण्डकान् ।
   अन्तस्थयमवर्ज तमूर्णापिण्डं विनिर्दिशेत् ।। या. शि. उ. 91
4. अन्तस्थयमसंयोगे विशेषो नोपलभ्यते ।
   अशरीरं यमं विद्यादन्तस्थं पिण्डनायकम् ।। या.शिक्षा उ. श्लो.92 ।।
5. वस्तुतोऽस्य तात्पर्य अन्तस्थयमसंयोगस्थले दारुपिण्डनामक एव । यत्र यमस्याशरीरत्वं स्वीक्रियते ,न वास्तविकयमविषये । अत एव यमः पूर्ववर्णसहितोऽनुनासिक उच्चार्यत इति सुस्पष्टम् ।।

ISSN - 0974-8946
जनवरी-मार्च, 2019

शोधप्रभा
वर्षः 44, प्रथमोऽङ्कः

वास्तुशास्त्रे पर्यावरणविवेचनम्

श्रीनवीनपाण्डेयः

वास्तुपरिचयः

वास्तुशास्त्रमपि ज्योतिषाङ्गभूतं वर्तते। वास्तुशब्दस्याभिप्रायः ''वसन्त्यस्मिन्नितिवास्तुः'' अर्थात् निवासोपयुक्तस्थानं वा यत्र जनाः निवसन्ति तदेव वास्तुः। अयं शब्दः 'वस्' निवासे धातौ 'तुण्' प्रत्ययेन निष्पन्नो भवति अस्यानेके भेदा भवन्ति।[1] यथा भवनम्, दुर्गः, प्रासादः, मठः, मन्दिरम्, नगरादयश्च। वैदिककाले उत्पन्नस्य वास्तुशास्त्रस्य पूर्णविकासः आगमपुराणयोः काले अभवत्। महाभारतकाले अस्य शास्त्रस्य पूर्णविकासस्य प्रमाणं मिलति। प्रारम्भिकावस्थायाम् एषा विद्यापूर्णरूपेण द्विजानां विद्यानाम्ना विख्याता आसीत्। यथा-

सुशीलः चतुरो दक्षः शास्त्रज्ञो लोभवर्जितः।
क्षमायुक्तो द्विजश्चैव सूत्रधारः स उच्यते।।[2]
वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः। यत् त्वमेहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे।।[3]

भारतीयजीवनं सनातनकालाद् देवाध्यात्म-प्रणीतं वर्तते। धर्मः जीवनस्य पारस्परिक एव भारतस्य वैशिष्ट्यम्। अस्माकं संस्कृतेः मूलाधारो देवतत्त्वात्मको वर्तते। अस्य देशस्य काऽपि कला देवकल्पनया बिना न वर्तते। नृत्यकलायां नटराजशिवस्य संगीतकलायां नाद-ब्रह्मणः आलेख्यकर्मणि जगन्नाथस्य पट्टचित्राणां यथा महत्वमस्ति तथैव वास्तुकलायां **''वास्तु-ब्रह्म''** राजते।

भारतीयवास्तुविद्यायाः निदर्शनं सर्वप्रथमं वेदेष्वेव प्राप्यते। आधुनिकप्रासादस्य प्रादुर्भावः वैदिकयज्ञविद्याया एवमभवत्। स्तुतिप्रधाने यज्ञप्रधाने चिन्तनप्रधाने च वैदिकयुगेऽपि यज्ञवेदी निर्माणाय वास्तुशास्त्रीयसिद्धान्तानां प्रयोगो भवति स्म। अत एव अथर्ववेदस्य उपवेदेन स्थापत्यवेदस्य रचना अभवत्। वास्तुशास्त्रस्य अष्टादशप्रसिद्धाचार्याः अभवन्-

---

1. संस्कृतहिन्दीशब्दकोशः वमानशिवराम आप्टे पृ. 945
2. राजवल्लभमण्डनम् अध्यायः 1 श्लो.41
3. ऋग्वेदः 7.54.1

भृगुरत्रिर्वशिष्ठाश्च विश्वकर्माभयस्तथा,
नरदो नग्नजिच्चैव विशालाक्षः पुरन्दरः,
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च,
वासुदेवोऽनिरुद्धश्च तथा शुक्रो बृहस्पतिः,
अष्टादशैते विख्याता वास्तुशास्त्रोपदेशका:॥[1]

वास्तुशब्दः बहुप्रकारेण निष्पद्यते। विद्येयं प्राचीना वैज्ञानिकी सर्वसाधारणोपकारिणी च वर्तते। अस्याः ज्ञानं ब्रह्मणा शिवाय, महादेवः च गर्गमकथयत्। गर्गात् पराशरः, पराशरात् वृहद्रथः, वृहद्रथात् विश्वकर्मणा ज्ञातम्। विश्वकर्मा एव इमा वास्तुविद्यां प्रसारयामास। विश्वकर्मणः मते शम्भुरेव अस्याः विद्यायाः आदिप्रवर्तकः। बहुषु स्थलेषु विभिन्नाचार्येः विद्येयं कथिता। अतः विश्वकर्मणः परं बहुभिराचार्यैः वास्तुविद्यायाः प्रसारोऽभूत्।

पर्यावरणम्-

'परित आवरणं पर्यावरणम्' अर्थात् जीवधारिणीन् ओषधिवनस्पतींश्च परितः यत् सामाजिकं सङ्घटनं वातावरणं, वायुमण्डलं विशेषतः पृथिव्यप्वायूनामुपस्थितिः तदेव पर्यावरणनाम्ना उच्चार्यते। पर्यावरणेषु भेदाः वर्तन्ते च- सामाजिक-वायवीय-जलीय- पार्थिव-चारित्रिक-बौद्धिक- शैक्षिक-खाद्यपेयादि भेदेन।

पर्यावरणसमस्यानिवारणोपायन्वेषणरता बहवः वैज्ञानिकाः विद्वांसश्च अहर्निशं चिन्तयन्ते परन्तु तस्य समाधानान्वेषणे रताः ते येषा आधुनिकग्रन्थानां परिशीलनं कुर्वन्ति। वस्तुतः तत्र स्थितांशाः वेदेषु अर्थशास्त्रेषु च पूर्वमेव प्रोक्ता आसन्।

आइंस्टीनमहोदय उक्तवान् द्वौ वस्तुनिऽनन्ते वर्तन्ते एकं ब्रह्माण्डं तथा द्वितीयं मानवानां मूर्खता। पूर्वकेन मानवेन स्वसम्मुखे अनेकानेकसमस्या उत्पादिता एताषां समस्यानां सूचीनिर्माणं तथा ताषां क्रमश अन्तिमसूची निर्माणं तथा ताषां अन्तिम रूपप्रदानम् अत्यन्तं कठिनं अपितु असम्भमस्ति। परञ्च यदि केवलं चतुर्णा समस्यानां चयनं करणीयं चेत् तर्हि अस्माकं दृष्टे समस्याचतुष्टय आगच्छति-

1. अशिक्षा 2. जनाधिक्यं 3. दरिद्रता 4. पर्यावरणप्रदूषणम्।

सर्वाः समस्याः सम्भूय एतादृशस्य पाशस्य निर्माणं कुर्वन्ति। मानवजाति अस्मात् पाशतः यदा बन्धनमुक्ता भवितुमिच्छति तर्हि स एतोपि अधिकरूपेण पाशबद्धाजायते। एतस्य कारणमस्ति एताः समस्याः परस्परसहयोगिन्यः सन्ति, एतस्य निर्मूलनमसम्भवमस्ति।

आभ्यः मुक्ते रेकराव उपायोस्ति सर्वाषामुपरि ·एकस्मिन् समये आक्रमणं करणीयम्। परञ्च इदमपि विचारणीयम् यत् समस्ये न केवलं कस्यापि देशस्य अपितु समस्तविश्वस्य समस्याऽस्ति।

1. मत्स्यपुराणः-251-2.3

अतः समस्तमानवजाति एकत्रितम् भूत्वा मुक्तिहेतवे प्रयासं कुर्यात्।

अधिकांशमनुष्याणां धारणा निर्मितास्ति समस्तपदार्थानां निर्माणं मनुष्याणां उपभोगार्थे अभवत् परञ्च वास्तविकता भिन्नमास्ति। मानवः स्वयं प्रकृतेः निर्माणं कर्तामन्यते। अतः मनुष्यः यावत् स्वकृते प्रकृतेः सामान्यरूपेण स्थानं न अङ्गीक्रियते अथवा दृष्टिकोणं विकसितं न क्रियते चेत् तावत् पर्यन्तं प्रकृतेः शोषणप्रक्रिया न स्थगितवती। प्रकृते सर्वाः क्रियाः स्वचालिताः सन्ति ताषां समस्थित्याः गुणाः विद्यमानाः सन्ति। प्रकृतेः भिन्न चक्रं यथा-नाइट्रोजनचक्रं, सल्फरचक्रं, फास्फोरसचक्रं, कार्बनचक्रं, ऑक्सीजनचक्रम् इत्यादि सर्वेचक्राणि स्वनियन्त्रितानि भवन्ति। प्रकृति एतेषां चक्राणां निरन्तरं साम्यवस्थां निर्माति। एतेषु मानवानां हस्तक्षेपः अत्यधिकोऽभवत्।

प्रकृतिसाम्यावस्थां प्राप्त्यर्थ करोति। नूतन प्रौद्योगिकी विकासानन्तरं प्राकृतिक क्रियाषु व्यवधानस्य गतिः तीव्रा भवति। एतत् नास्ति यत् मनुष्यः प्रकृतेः अस्याः अवस्थां न अनुभवति। सः अनुभवति, परन्तु स्वार्थपरकतायाः कारणेन सः प्रकृते अप्राकृतिकशोषणकरणे अन्धः जातः। अतः अप्राकृतिकशोषणस्य स्थाने दोहनं अवश्यमेव जानीयात्। अन्यथा प्रकृतेः कोप अवश्यमेव भोक्तव्यः। प्राचीनकालादेव अस्माकं ऋषि-महर्षयः पर्यावरणस्य महत्वं ज्ञात्वा स्वकृते निर्माणकार्य कुर्वन्तिस्म। यदि वयं मानवानामैवञ्च तेषां भौतिकपर्यावरणमध्ये क्रिया-प्रतिक्रियानां विवेचनां कुर्मः चेत् निसंदेहरूपेण अस्माभिः प्राप्यते यत् भूम्योपरि मानवसमुदायानां स्वरूपं एवञ्च तेषां संस्कृतिः भौगोलिकप्रभावैः प्रभाविता भवति।

आकाशोवायुरग्निर्जलं पृथिवीति पाञ्चभौतिकतत्वानि जगत उपादानकारणी भूतानि जीवनाधारकाणि च वर्तन्ते। वैदिकऋषयस्तथ्यमिदं सम्यक् परिचिन्त्य एतेषां यथास्थितिरक्षणाय निरनतरं जागरूका आसन्। एतेषां साक्षात्कृतमन्त्रेषु धार्मिकेषु विधानेषु कर्मकाण्डयागादिप्रयोगेषु च तथ्यमिदं नितरां स्फुटीभवति। परिणामतः प्राचीने भारते पर्यावरणप्रदूषणस्य समस्या न आसीत्।

कदाचित्तेषां प्रवृत्तिमनुसृत्य जनाः प्रवर्तेरन् तदाऽद्यापि पर्यावरणप्रदूषणं दूरमपसरेत्। भारतराष्ट्रस्य प्राकृतिके परिवेशे विश्वशान्तये विविधानि-विविधानि कुर्वन्तस्तत्फलं च दर्श दर्श तदर्थमृषयो निश्वितामेकां विधासरणिं शास्त्रेषु व्यवस्थापितवन्तः।

भूमिवृक्षाकाशादिविषये तैर्यदुक्तं तद्विपरीताचरण्स्यैव फलं यदद्य पर्यावरणप्रदूषणं विकरालरूपमाधृत्य तदासाध्यमिव विलोक्यते।

वास्तुशास्त्रस्यापि सैव स्थितिः। वेदमन्त्रेष्वेव वास्तुविद्या बीजान्युप्तानि परिलक्ष्यन्ते। तत्र त्वष्टाऽऽख्यो देवो विश्वकर्मा सृष्टेः प्रथमो वास्तुशिल्पी परिलक्ष्यते। वैदिकवाङ्मयेऽसौ तावतीं प्रख्यां न धत्ते यथा पौराणिके वाङ्मये। पुराणकथासु त्वष्टा विश्वरूपस्य पिता। इन्द्रेण विश्वरूपे निहते सति क्रुद्धस्त्वष्टा तद्विनाशाय महाभैरवं वृत्रं जनयति। पुराणेषु त्वष्टा-विश्वकर्मणोः प्रायेण समन्वितं रूपं दृश्यते उभावेव मिथः पर्यायभूतौ। विश्वकर्मण एव पुत्री संज्ञा सूर्यस्य भार्याऽऽसीदित्यपि ज्ञायते।

अपरो वास्तुशिल्पी पुराण-रामायण-महाभारतादिषु भूयस्त्वेन वर्णितो मयासुरः। अस्यैव पुत्री मन्दोदरी लङ्काधिपस्य रावणस्य भार्या आसीत्। स एव मयः खाण्डवनदाहप्रसङ्गे महाभारतेऽपि समवलोक्यते। अर्जुनेन संरक्षितोऽसौ प्रह्वीभूतो युधिष्ठिरकृते विलक्षणामेव कामपि राजसभां निर्मितवान्, यत्र जलमपि स्थालयते स्म, स्थलञ्च जलमिव। रामायण महाभारतयो उभयो अपि विद्यमानो मयश्चिरंजीवी परिलक्ष्यते। तन्नाम्ना लब्धकीर्तिवास्तुग्रन्थो मयमतमिति मयमतसंहितेति वा सम्प्रत्युपलभ्यते, यस्मिन् भारतीयवास्तुशिल्पस्य अद्भ ुतं प्रतिपादनमुपलभ्यते। ग्रन्थोऽयमिदानीमेव इन्दिरागान्धी कला केन्द्र नाम्नया दिल्लीस्थसंस्थया सम्यक्तया प्रकाशितः।

वास्तुविद्यायाः विस्तृतं साङ्गोपाङ्ञ्च प्रतिपादनं सर्वप्रथमवलोक्यते अग्निपुराणे (38 तः 61 तम अध्यायं यावत्) पुराणान्तरमेव स्वतंत्रवास्तुग्रन्थाः प्रणीताः। मयमतं तत्र महीयते तदनन्तरमेव मालवधीश्वरो भोजदेवः (1001-54 ई.) स्वोपाज्ञं वास्तुविद्याग्रन्थ। समराङ्गणसूत्रधारं प्रणीतवान्। तत्परम्परायामेव निरञ्जनमहापात्रप्रणीत शिल्प रत्नकोषादयो ग्रन्थाः परिवर्तनः परिलक्ष्यन्ते। अग्निपुराणे देवगृहे-प्रासाद-सभा-जयस्तम्भादीनां निर्माणस्य प्रतिष्ठायाश्च।

प्रशस्तो विधि वैज्ञानिकरीत्या समुपदिष्टः। सर्वेप्येते विषयास्तत्र प्रसादाः शीर्षकेणैव व्याख्याताः। यस्य यत्र पवित्रता स्वच्छता अपेक्षिता, तस्य तत्र वासः सर्व कल्याणकारी भवतीति। अथ च प्रस्तुत वास्तुशास्त्रमुपर्युक्तज्योतिः शास्त्रस्य संहिताभागान्तर्गतं कात्यायनसूत्रविद्यायाऽथर्ववेदोपवेदस्थापत्यप्रतिपादितं यत्तवेदाधिकृत्यधिकृतो देव शिल्पी विश्वकर्मा, यज्ञार्थ बीजान्तर्गतो उर्वरकशक्तिविलुप्तामही महाराजपृथुनामनृपतौ उर्वरकवतीं वासयोग्यां सम्पादयितुं कृतप्रयत्ने सति व्याकुलीभूता ब्रह्मणः शरणं गता, मीलिताक्षी पृथुजन्यां स्ववेदनां निवेदयन्ती आसीदति पौराणिक परम्परा। तदानीमेव महाराजपृथोः साहाय्यं कर्तुं निवासानुकूलां समधरातलाम् उर्वरकवतीं विधातुं श्री ब्रह्मणोपदिष्टो देव शिल्पी विश्वकर्मा सदैव भूमौ समागत्य महाराजपृथोराज्ञया सर्व सथेष्टं सम्पादितवानिति।

पर्यावरणपरिरक्षणांशानां प्रासङ्गिकता वेद-अर्थशास्त्रोक्तदिशा-

प्रायः मानवाः स्वार्थिनः भूत्वा स्वलाभाय प्रयतन्ते न तु इतरेषां हिताय। स्वार्थसिद्धये ते केवलं देहधारिणानमेव न हिंसन्ति अपि तु प्राकृतिकनियमानपि उल्लङ्घयन्ति। तत्परिणाम एव इदानीं सर्वैः मनुजै अनुभूयते। यथा हिमालयपर्वतानां सान्द्रता, वृक्षच्छेदनेन वृष्ट्यादिनियमानां वैपरीत्यम् अतिवृष्ट्यनावृष्ट्यादिरूपेण परिणतिः। समुद्रस्तस्य उन्नतिः। एवञ्च नवरोगैः पीडिताः मनुजा एतानि एव अद्यतने प्राकृतिकविपदारूपेण परिणतिमवाप्य मनुजै अनुभूयते। एताभिः समस्याभिः पीडिताः न केवलं मानवा अपितु सर्वेऽपि जीविनः पर्यावरणप्रदूषणाधिक्येन भीताः वर्तन्ते। दूषिते हि पर्यावरणे जीवनं स्वल्पतरं वा रूग्णं वा दुःखभूयिष्ठं वा वर्तते। एवञ्च वैज्ञानिकयन्त्राणां प्रदूषणेन दूषिते पर्यावरणे समग्रा पृथिवी एव न दूषिता अपितु सम्पूर्णान्तरिक्षमपि दूषितम्। पर्यावरणसमस्या इयं न केवलं मनुजैः अपितु जलचरैः खेचरैश्चापि प्राप्यते। परन्तु चिन्तनशक्तिस्तु केवलं मानवाधीनामतः त एव समस्याया उत्पादकाः शमयितारोऽपि।

आद्यं वेदेषु पर्यावरणसंरक्षणोपायाः

पर्यावरणं कथं दूषितं भवति? इत्यस्मिन् विषये परिशीलयामश्चेत् ज्ञायते यत् मानवाः स्वशरीरात् मलमूत्रादिविसर्जनं बहिः प्रदेशेषु कुर्वन्ति येन पृथिव्यप्य वायवादीनि भूतानि दूषितानि भूत्वा इतरेषामस्वास्थ्याकारणानि भवन्ति।

तथा च यन्त्रागारेभ्यः निस्सारिताः अवकराः, प्लास्टिक, ज्वालने दूषितञ्च वातावरणं हितकरं स्वास्थ्यकरं च न भवति।

अतः वेदेषु तत्वदर्शिभिः महर्षिभिश्च निरन्तरं वायुजलादीनां शुध्दतयाः कृते प्रार्थितम्। यतो हि शुध्द वायोः सेवनेन जीविनः चिरं जीवन्ति दीर्घायुञ्च अवाप्नुवन्ति। अत एव दुर्गन्धविकारयुक्तो वायुः सर्वदा परिहर्तव्युः। एवञ्च मनुजैः तथा प्रवर्तितव्यं यथा वायौ दुर्गन्धः न भवेत्। यदा शुध्दवायुः वाति तदैव प्राणिनां प्राणाः स्थिराः पुष्टाश्च भवन्ति। विकृते वायौ जीवितं सोढुमशक्यम्। तदेव कालिदासेन प्रोक्तम्- **''यथा प्राणिनः प्राणवन्तः''**[1] इति वायोः जीवने कियत् प्राधान्यं वर्तते इत्यस्मिन् श्लोकेन ज्ञायते। वेदे बहुत्र वायोः स्तुतिं कृतवन्तः तथा च प्रार्थयन्तः यत् -

निर्दोषाः सुगन्धाः वाताः वान्तु।
वाताः अभितो मधुक्षरन्तु सुखवृध्दिञ्च कुर्वन्तु॥[2]

''जगति वायुः पितेव पाति, भ्रातेव सम्भरणं करोति, मातेव निर्माति, जीवायुं तनोति, लोके चिरम् स्थातुं प्रोत्साहति। जीवानामृतनिधिरूपाः वायवः सर्वप्राणिनां प्राणाधारः।

वायुः शारीरिकमलानि विनाशयति प्राणांश्च प्रयच्छति॥[3]

वात आ वातु भेषजं शम्भु मयोभु नो हृदे। प्रण आयूषि तारिषत्। उत वात पितासि न उत भातोत नः सखाः। सनो जीवतवे कृधि। यददो वातते गृहेऽमृतस्य निधिर्हितः। ततो नो देहि जीवसे।[4]

प्रदूषिते वायौ श्वासग्रहणेन मनुजाः अल्पजीविनः भवन्ति। शुध्दे वाते च श्वासग्रहणे दीर्घजीविनः भवन्ति शुध्दवातौ मानवाः कथं जीवान्विताः भवन्तीति वेदे प्रोक्तम्-

द्वाविमौ वातौ वात आसिन्धोरो परावतः।[5]

जल विषये यथा-

1. अभिज्ञानशाकुन्तलम्-1
2. मयोर्भूर्वातो अभितु। ऋ. 10/169/1
3. ऋ. 10/186/1-31
4. सामवेद-20-8-7 पृ. 45
5. ऋ. 10/187/2,3

''शरीरपुष्ट्यर्थं शुध्दा-आपः अप्रियाणि स्वादशून्यानि अस्वास्थ्यकराणि च तत्वानि निस्सरयन्ति अथर्ववेदे द्वादशतमे काण्डे प्रचोदितः। एवञ्च ऋषयः ऊचुः यत् अहञ्च पवित्रेण पयसा स्वशरीरं परिवर्धयामि परिशुद्धञ्च करोमि।।''

''शुध्दा न आपस्तन्वे क्षरन्तु यो न सेदुरप्रिये
तं निदध्मः पवित्रेण पृथिवी मोत् पुनामि।।''[1]

एवञ्च अथर्ववेदस्य प्रथमकाण्डे ऋषिः प्रार्थयते यत् - **''हिरण्यवर्णाः शुचयः''[2]**

यासां जनयिता सविता, सुवर्णमयाः याः विद्यते, याश्च पायं भवन्ति पुमांसः परिपुष्टाः या देवानां पेयाः, याश्चन्तरिक्षे बहुधा विद्यन्ते, ता आपो मे शिवाः सन्तु, मदीयां त्वचं सुखमयं कुर्वन्तु घृतरूपाः पवित्राश्च भूत्वा स्योना भवन्तु। एतेन ज्ञायते यत् जलशुद्धिकरणमावश्यकम्। भूयिष्ठानि आपः शोध्यानि, अन्तरिक्षस्थानानि पेयानि, स्रोतसां पेयानि च संशोध्यानि। एवञ्च पवित्रेषु नदीनदजलेषु कदापि कथमपि च दूषितानि नीराणि न पातनीयानि।

यत्पेयजलं विद्यते तत् कूपे वा तडागे वा वाप्यां वा नद्यां वा भवतु सर्वदा मनुजैः स्वच्छं विधेयम्। अपवित्राणां मलमूत्रादिदुर्गन्धयुक्तानां प्रक्षेपः जले कदापि न कार्यः। यतो हि कदापि कुत्राऽपि पेयमशुद्धं न स्यात्। अशुद्धेन जलेन रोगानाम् उत्पत्तिर्जायते। शुद्धजलस्य सेवनेन मानवा अपितु औषधिवनस्पतयश्च अरोगाः स्वस्थाः वर्तन्ते। साम्प्रतिके प्रायः महानगराणां दूषितानि जलानि नद्यादिषु प्रक्षिप्यन्ते। येन सर्वमपि पेयजलमपेयं भवति। प्रदूषितेन कलुषितजलपानेन जलचराः मृताः भवन्ति। ये जलचराः स्वसेन जलं पावयन्ति त एव प्रदूषणयुक्तेन जलेन म्रियन्ते। अतः वेदे शुद्धजलेन अशुद्धजलस्य मेलनं सर्वदा वर्जितम्। अपवित्रजलानां गमनं यथा भूमेः अधोऽधो यथा भवेत्तथा सर्वकारैः चिन्तनीयम्।

वनस्पतिः-

प्रदूषितवातावरणं कथं शुद्धी करणीयम् इति चिन्तिते सति तस्य समाधानं वृक्षारोपणेन पर्यावरण निवारणमिति अथर्ववेदे प्रोक्तम्-

यस्यां वृक्षा वानस्पत्या ध्रुवास्तिष्ठन्ति विश्वहा।[3]

वृक्षलतागुल्मादि विनां जलाशयः शुशोभितो न भवति। अतः जलाशयसमीपे राजमार्गसमीपे च वृक्षारोपणं करणीयम्। निर्जन प्रदेशे, अरण्ये, पर्वतप्रदेशे स्वयमेव वृक्षाः प्रादुर्भवन्ति, परं ग्रामेषु राजमार्गेषु च वृक्षाः मनुजैः एव रोप्यन्ते। दीर्घायुर्वृक्षाः वृष्टिजलवायुशुद्धिकरणे समर्थाः भवन्ति। तदानीनन्तकाले ये पथिकाः सन्ति ते वृक्षच्छायातले विश्रान्तिं स्वीकुर्वन्ति। बुभुक्षिते सति फलानि

1. अथर्ववेद 12/1/30
2. अथर्ववेद 1/33/1-4
3. अथर्ववेद- 12.1.27

खादन्ति। वृक्षाः एते सर्वेभ्यः सिद्धेभ्योऽनाथेभ्यः तथा वयसादिकमविगणय्य फलदानेन स्वकर्तव्यं निर्वहन्ति। वेदे ऋषि प्रार्थयते- हे भूमिमाता! वृक्षरहितानि ते स्थानानि पूरितानि स्युः, वृक्षेच्छेदव्याजेन कदापि तव मर्म मया व्याहृतं न भवेत्-

यत्र भूमे विखनामि क्षिप्रं तदपि रोहतु।
या ते मर्म विमृग्वरि मा ते हृयमर्पितम्।।[1]

यजुर्वेदे पर्यावरण शुद्धिमभिलक्षैव ओषध्यादीनां हिंसा निषिध्दा। केवलं प्राण रक्षार्थमेव वनादोषधिमाहरेद्नान्यथा। यथा अग्निसोमसूर्यादीनां देवतात्वं वेदेषु अङ्गीकृतं तथैव पादपानामपि देवतात्वमङ्गीकृत्य स्थाने-स्थाने वृक्षाणां स्तवनं महर्षिभिः कृतम्। यथा-

''नमो वृक्षेभ्यः। वृक्षाणां पतये नमः ओषधीनांपतये नमः।''[2]

अन्तरिक्षस्थवायुमण्डले, जलमण्डले, प्रकाशमण्डले वा कस्यचित् हिंसाकृते वा हानिकृते वा दोषो मा जनिष्टेत्येतत् कथनेन वायुप्रदूषणं, ध्वनिप्रदूषणं वा न कार्य मनुष्यै इति ज्ञायते। प्रकृतिः यद्यपि स्वयमेव अग्न्यादिभिश्च दोषं शोधयति परं मनुजनिर्मितं प्रदूषणं शोधयितुं सा नैव शक्या। एवं वायु-आप-ध्वनिप्रदूषणभीतैर्मनुजैः पादपसंवर्धनेन यज्ञैश्च करणेन पर्यावरणं संरक्षितं भवति तद्वारा शारीरिक दोषा अन्यदपगत्य शरीरशुद्धिरपि भवति।

पुत्रोऽहं पृथिव्याः-

अथर्ववेदेऽस्मिन् पृथ्वीकृते मातृ शब्द अङ्गीकृतः **''माता भूमिः पुत्रोऽहं पृथिव्याः''**[3] स्वमातुः कोऽपि शोषणं करोति? परञ्च सामायिक युगस्य मानवः स्वभोगवृत्तिशान्ति करणार्थे व्यर्थचेष्टां करोति। यद्यपि अस्माकं महर्षयः पूर्वमेव चेतयन्ति स्म। भर्तृहरेरूक्ति दर्शनीया भोगानां भोगाः सम्भवं नास्ति अतः स उक्तवान् तृष्णा कदापि जीर्णा न भवति।

अर्थशास्त्रोक्तदिशा पर्यावरणसंरक्षणोपायाः -

कौटिल्येन पर्यावरणस्य संरक्षणार्थ तथा राज्ञाम् कर्तव्यं किम् इति संसूचितम्- विविधाराण्यानां, जलानाञ्च संरक्षणं कथं करणीयं तथा गृहनिर्माणं कथं करणीयं येन पर्यावरणं कलुषितं न भवेत् यथ च जनाः स्वस्था दीर्घायुश्च भवेयुः इति विचिन्त्य स्वकीय-अर्थशास्त्रे बहुशः संसूचितम् तद्यथा-

* ''राज्ञा वनानां संरक्षणम् अवश्यमेव करणीयम्। हस्तिवनमपि रक्षणीयम्। सेतुबन्धः करणीयः तस्य संरक्षणं तथैव नवीनस्यापि निर्माणं करणीयम्।''[4]

---

1. अथर्ववेद 12/1/35
2. यजुर्वेद 16/17/-19
3. अथर्ववेद-12-1-12
4. कौ.अर्थ.शा. 2/1/39

* "उपलब्धभूम्यानुसारेण नृपः मृगवनं निर्मीयात् तत्र द्वारप्रान्तात् समागता आनीताश्च मृगाः भवेयुः तथैव वनव्यवस्थार्थ वनेचराः वसेयुः तत्र।"[1]

* "जनपदेषु हस्तिवनं स्थापयेत्। तेषां संरक्षणमपि कारयेत्। एवं हस्तिनं हन्ति तेभ्यः प्रादण्डः एव दीयेत्"[2]

गृहनिर्माणसमये अवधेयांशाः-

पर्यावरणानुसारेण गृहाणि निर्मातव्यानि। गृहस्य निर्माणं तथा भवेत् यथा द्वि-त्रि दिनपर्यन्तं जलसंरक्षणं सुलभतया भवेत्। तथा च गृहे उदपानोपनालायाः निर्माणं कुर्यात्। एवमनावश्यकजलं मलमूत्रादिनिर्गममार्गम् अथवा प्रस्त्रवणप्रपातानां निर्माणं कुर्यात्। तस्यातिक्रमणे चत्वारिंशतष्टपञ्चशत्पणो दण्डः।[3]

एवं कौटिल्येन बहूनां दण्डिनां विषये उल्लेखः कृतः। ये पर्यावरणं प्रदूषयन्ति जनप्रदेशेषु तान् प्रति। यथा-

* "रथ्या पांसुन्यासे तेभ्यः अष्टभागः पणः दण्डः भवेत् यदि पङ्कोदकेन मार्गस्य निरोधं कुर्युः तर्हि तेभ्यः एकपणस्य चतुर्थांशः दण्डः।"

* "राजमार्गे एवं कृते तर्हि तेभ्यः द्विगुणितं दण्डः"।[4]

* "सार्वजनिक स्थलानां संरक्षणं सर्वेषां मानवानां अद्यकर्तव्यं वर्तते नो चेत् दण्डानामनुभोक्ता भवेत्"।।

* "मानव समाजेभ्य कण्टकद्वयं वर्तते- मानुषी दैवी च। दैवीयकण्टकम् अष्टधा वर्तते- अग्निरूपकं, व्याधिदुर्भिक्षं, मूषिका, व्यालाः, सर्परक्षांसीति। एतेभ्यः जनपदं देशञ्च रक्षयेत्। तदर्थ पूर्वसज्जादिकं करणीयम्।"[5]

* ग्रीष्मकाले अग्नेः निषेधः कार्यः।

* मध्याह्ने अग्नौप्रज्वालिते सति एकपाषाण्टम्भागः दण्डः।

---

1. कौ.अर्थ.शा. 2/2/4,5
2. कौ.अर्थ.शा. 2/2/7, 8
3. कौ.अर्थ.शा. 3/8/9, 10
4. कौ.अर्थ.शा. 2/36/26, 27
5. कौ.अर्थ.शा. 4/3/1, 2

